कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 164 विषय वैदिक.

नाव. होमविधान प्रयोग (mss).

लेखक/लिपीकार —.

पृष्ठ 44 काळ — पूर्ण/अपूर्ण

॥ अथ हौत्रविधानप्रयोगप्रकृतिप्रारंभः ॥

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥
तिलकृष्णाजिनतुलसीसहितायां दक्षिणाग्रकुशानास्तृता
मुमूर्षोर्भस्मलेपनं गंगामृत्तिकायुक्तं कृत्वा परमेश्वरस्य स
त्संगे जान्वो धारित शिरास्थितो ॥ पितुः राम शर्मणो नेत्स्कंद
मृतत्वप्राप्तये भगुर्वै वारुणिः अंभस्यपारे ॥ आयुषः प्राणं
दि पुराणगीतासहस्रनामादीनि श्रावयेत् ॥ व्यसुं ज्ञात्वा ॥ ह
ष्टमाबध्य ॥ गृहे प्रेतं संस्नाप्य ॥ भस्मतिलतुलस्यादिना अलं
मुखे सुवर्णं निधाय ॥ नलदमाला माबध्य ॥ तदभावे ॥ जपाकुसुममा
लां वा ॥ पिष्टदीपैः उद्दीप्य ॥ नयनार्थं कटं निबध्यात् ॥ अहतेन वास

सा त्रिभिर्भागैः प्रेतं आच्छाद्य ॥ चतुर्थभागं छित्वा तेन उत्तरीयं कुर्या
त् ॥ प्रेतकृत्ये तदेव धार्यं ॥ कर्ता त्रिपाद्यं ॥ स्मार्ताग्निं अभावे लौकि
काग्निं वा गृहीत्वा ॥ स्वज्ञातयः अन्यैर्वा प्रेतं नयेयुः ॥ प्रेताग्निमध्ये
अन्यैर्न गंतव्यं ॥ दहनभूमिं गत्वा ॥ तस्याः पश्चिमतः प्रेतं उत्तार्य ॥ वाह
काः उदीचीं दिशं निष्क्रामंति ॥ कर्ता स्नात्वा ॥ पवित्रपाणिः आचम्य
अमंत्रप्राणानायम्य ॥ विष्णुर्विष्णुः श्रीमद्भ॰ पुराणोक्तफलप्राप्त्यर्थं ॥ ८
प्राचीनावीति ॥ निर्दिष्ट दिन गोत्रस्य राम प्रेतस्य प्रेतोत्थान निमित्तं
हिरण्यश्राद्धं करिष्ये ॥ हिरण्यश्राद्धं प्रकृतिस्तु अग्रे वक्ष्यते ॥ पि
ष्टपिंडदानं कृत्वा पिंडदान पूजाविसर्जनप्रकारस्तु अग्रे विषमश्राद्धे

हो॰ वि॰
२

वक्ष्यते ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य ॥ प्रेतस्याविछिन्न
स्य गृह्याग्नेः एतावत्कालपर्यंतं गृह्याग्नित्यागजन्यदोषपरिहार
द्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रत्यब्दं प्राजापत्यप्रायश्चित्तं रजतप्र
त्याम्नायेन आचरिष्ये ॥ तथाच लुप्तानां सायंप्रातर्होमाणां दर्शपू
र्णमासस्थालीपाकानां च व्रीह्याज्यतंडुलद्रव्यैः सन्निकृष्य द्रव्यं सू
तकांते दातुमहमुत्सृजे ॥ प्रेतस्य विछिन्नस्य गृह्याग्नेः पुनः स्वी
कारार्थं अयाश्चाग्नेरित्येकामाज्याहुतिं होष्यामि ॥ अग्निं प्रति
ष्ठाप्य तूष्णीमग्निं परिषिच्य परिस्तीर्य आज्यं संस्कृत्य दर्व्याऽऽज्यं
गृहीत्वा ॥ अयाश्चाग्नेस्यनभि॰ भेषज२ स्वाहा ॥ अग्नय इदं॰ २

दर्वीमग्नौ प्रहृत्य ॥ तूष्णीं परिषिच्य ॥ एवं अग्निसिद्धिं विधाय ॥ आच
म्य प्राणानायम्य देशकालौ संकीर्त्य पितृमरणकाले संभावितानां उ
च्छिष्टोच्छिष्ट अधरोच्छिष्टोभयोच्छिष्टानां अंतरामरण अस्नातकम
रण कर्ममंत्ररहित मरण खट्वोपरिमरण बंधमरण पर्युषित
दाह भूतनिमित्त प्रत्यवायपरिहारार्थं पंचदश द्वादश षट्कृच्छ्रत्र
य प्रायश्चित्तं रजतप्रत्याम्नायेन सद्यः सूतकांते वा आचरिष्ये ॥ त
तः आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम पितुः और्ध्वदेहि
काधिकारार्थं प्राजापत्यप्रायश्चित्तं सूतकांते आचरिष्ये ॥ ततः
अग्नि ॥ उदकुंभः ॥ तिलाः ॥ आज्य ॥ कुशाः ॥ हिरण्यशकलानि ॥ शा

मीशाखाग्रहीता ॥ आचम्य देशकालौ संकीर्त्य नेत्स्यंद्रन गोत्रस्य रामप्रेत
स्य प्रेतत्वविमुक्त्यर्थं पितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थं ॥ होत्रविधानेन
दहनक्रियां करिष्ये ॥ स्त्रीप्रेते तु गोत्रायाः काशीप्रेतायाः प्रेतत्ववि॰ ध्ये
हिरण्यशकलपलाशशाखाशमीशाखावाग्रहीता ॥ अपेत वीत वि च
सर्पतातो ये त्र स्थ पुराणा ये च नूतनाः ॥ अहोभिरद्भिरक्तुभिर्व्यक्तं
यमो ददात्ववसानमस्मै इति भूमिं संमृज्य दक्षिणतः शाखांनिर
स्य अप उपस्पृश्याद्भिरवोक्ष्य ॥ दहनदेशे किंचिद्धिरण्यं निधाय त
त्र दक्षिणाप्राची दारुचितिं शुष्कगोमयचितिं वा रचयेत् ॥ अग्रद
क्षिणं दर्भैरग्निं चितिं च परिस्तीर्य ॥ त्रिरप्रसव्यं परिषिच्य ॥ ततः

सर्वौषधिमिश्राभिरद्भिः कुंभं पूरयित्वा तेनोदकेन चित्तिस्रुगित्यनुवाकेन
प्रेतं स्नापयेत् ॥ चित्तिस्रुक् ॥ चित्तमाज्यं ॥ वाग्वेदिः ॥ आधीतं बर्हिः ॥ केतो
अग्निः ॥ विज्ञातमग्निः ॥ वाक्पतिर्होता ॥ मन उपवक्ता ॥ प्राणो हविः ॥
सामाध्वर्युः ॥ वाचस्पते विधे नामन् ॥ विधेम ते नाम ॥ विधेस्त्वम
स्माकं नाम ॥ वाचस्पतिः सोमं पिबतु ॥ आस्मासु नृम्णं धात्स्वाहा ॥
ततः प्रेतं चितिमारोप्य ॥ तस्य प्राणायतनेषु हिरण्यशकलान् आभावेआ
ज्यबिंदून्वा निदध्यात् ॥ तत्र मंत्रः ॥ चित्तिस्रुगासीत् ॥ चित्तमाज्यमा
सीत् ॥ वाग्वेदिरा॰ ॥ आधीबर्हिरा॰ केतो अग्निरा॰ विज्ञातमग्निरा॰
वाक्पतिर्होता॰ मन उपवक्ता॰ प्राणो हविरा॰ सामाध्वर्युरासीत् ॥

इति द्विरावृत्यानासिकछिद्रयोर्हिरण्यहिरण्यशकान्निदध्यात् ॥ पृथिवी
होतासीत् ॥ द्यौरध्वर्युरा॰ रुद्रोग्निदा॰ बृहस्पतिरुपवक्तासीत् ॥ इति मुखे ॥
अग्निर्होतासीत् ॥ अश्विनाध्वर्यूरास्तां ॥ त्वष्टाग्निदासीत् ॥ मित्र उपवक्ता
सीत् ॥ इति द्विरक्ष्णोः ॥ सूर्यं ते चक्षुः ॥ वातं प्राणः ॥ द्यां पृष्ठं ॥ अंतरिक्षमा
त्मा ॥ अंगैर्यज्ञं ॥ पृथिवीं शरीरैः ॥ इति द्विकर्णयोः ॥ महाहविर्होतासी
त् ॥ सत्यहविरध्वर्युरासीत् ॥ अच्युतपाजा अग्निदासीत् ॥ अच्युत
मना उपवक्तासीत् ॥ अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरावास्तां ॥
अयास्य उद्गातासीत् ॥ इति कुक्ष्योः ॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य
जातः पतिरेक आसीत् ॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा

विधेम इति नाभ्यां ॥ ततः ॥ अग्निर्यजुर्भिः सेनेंद्रस्येति द्वाभ्यामनुवा
काभ्यां अग्निं प्रज्वालयेत् ॥ अग्निर्यजुर्भिः ॥ सविता स्तोमैः ॥ इंद्र उक्था
मदैः ॥ मित्रावरुणावाशिषा ॥ अंगिरसो धिष्णियैरग्निभिः ॥ मरु
तः सदो हविर्धानाभ्यां ॥ आपः प्रोक्षणीभिः ॥ ओषधयो बर्हिषा ॥ अदि
तिर्वेद्या ॥ सोमो दीक्षया ॥ त्वष्टेध्मेन ॥ विष्णुर्यज्ञेन ॥ वसव आज्येन ॥ आदित्या
दक्षिणाभिः ॥ विश्वेदेवा ऊर्जा ॥ पूषा स्वगाकारेण ॥ बृहस्पतिः पुरोधया ॥
प्रजापतिरुद्गीथेन ॥ अंतरिक्षं पवित्रेण ॥ वायुः पात्रैः ॥ अहं श्रद्धया ॥ १ ॥
सेनेंद्रस्य ॥ धेना बृहस्पतेः ॥ पथ्या पूष्णः ॥ वाग्वायोः ॥ दीक्षा सोमस्य ॥ पृ
थिव्यग्नेः ॥ वसूनां गायत्री ॥ रुद्राणां त्रिष्टुप् ॥ आदित्यानां जगती ॥ वि

ग्नेरनुष्टुप्॥ वरुणस्य विराट्॥ यज्ञस्य पंक्तिः॥ प्रजापतेरनुमतिः॥ मित्र
स्य श्रद्धा॥ सवितुः प्रसूतिः॥ सूर्यस्य मरीचिः॥ चंद्रमसो रोहिणी॥ ऋषी
णामरुंधती॥ पर्जन्यस्य विद्युत्॥ चतस्रो दिशः॥ चतस्रो वांतरदिशाः॥ अ
हश्च रात्रिश्च॥ कृषिश्च वृष्टिश्च॥ त्विषिश्चापचितिश्च॥ आपश्चौषध
यश्च॥ ऊर्क्च सूनृता च देवानां पत्नयः॥ इत्यग्निं प्रज्वाल्य॥ ततः चिति
मग्निं उपतिष्ठते॥ वाचस्पते विधे नामन्॥ विधेम ते नाम॥ विधेस्त्वमस्मा
कं नाम॥ वाचस्पतिः सोमं पिबतु॥ आस्मासु नृम्णं धात्स्वाहा॥ वाचस्पते
वाचो वीर्येण॥ संभृततमेनायक्ष्यसे॥ यजमानाय वार्यं॥ आसुवस्कर
स्मै॥ वाचस्पतिः सोमं पिबति॥ जजनदिंद्रमिंद्रियाय स्वाहा॥ सोमः सोम

स्य पुरोगाः॥ शुक्रः शुक्रस्य पुरोगाः॥ श्रातास्त इंद्र सोमाः॥ वातापेर्हव
नः श्रुतः स्वाहा॥ वाचस्पतेछिद्रया वाचा॥ अछिद्रया जुह्वा॥ दिवि देवा
वृधं होत्रामेरयस्व स्वाहा॥ वाचस्पते हृद्विधे नामन्॥ विधेम ते नाम॥
विधेस्त्वमस्माकं नाम॥ वाचस्पतिः सोममपात्॥ मा दैव्यस्तंतुश्छेदि मा
मनुष्यः॥ नमो दिवे॥ नमः पृथिव्यै स्वाहा॥ वाग्घोता॥ दीक्षा पत्नी॥
वातोध्वर्युः॥ आपोभिगरः॥ मनो हविः॥ तपसि जुहोमि॥ भूर्भु
वः सुवः॥ ब्रह्म स्वयंभु॥ ब्रह्मणे स्वयंभुवे स्वाहा॥ ब्राह्मण एक होता॥
स यज्ञः॥ स मे ददातु प्रजां पशून्पुष्टिं यशः॥ यज्ञश्च मे भूयात्॥ अग्नि
र्द्विहोता॥ स भर्ता॥ स मे ददातु॰ भर्ता च मे भूयात्॥ पृथिवी त्रिहोता॥

सप्रतिष्ठा ॥ समेदद्दा॰ ॥ प्रतिष्ठा च मे भूयात् ॥ अंतरिक्षं चतुर्होता ॥
सविष्ठाः ॥ समेददा॰ ॥ विष्ठाश्च मे भूयात् ॥ वायुः पंचहोता ॥ सप्रा
णः ॥ समेददा॰ ॥ प्राणश्च मे भूयात् ॥ चंद्रमाः षड्ढोता ॥ सर्तूंन्कल्पया
ति ॥ समेददा॰ ॥ ऋतवश्च मे कल्पंतां ॥ अन्नं सप्तहोता ॥ सप्राणस्यप्रा
णः ॥ समेददा॰ ॥ प्राणस्य च मे प्राणो भूयात् ॥ द्यौरष्टहोता ॥ सोनाधृ
ष्यः ॥ समेद॰ ॥ अनाधृष्यश्च भूयासं ॥ आदित्यो नवहोता ॥ सतेज
स्वी ॥ समेद॰ ॥ तेजस्वी च भूयासं ॥ प्रजापतिर्दशहोता ॥ सइदं स
र्वं ॥ समेददा॰ ॥ सर्वं च मे भूयात् ॥ इष्टकपरिष्ठाय ॥ धातारस्तु वांतु पृथि
पुण्यगंधा मनः सुभा गात्राः सुखानुलोमाः ॥ त्वच सुखा मांस सुखा

या

रा

६

मांस सुखास्ति सौरव्या मरुतः सुकृतां यत्र लोकाः ॥ इति सर्वेषां बा
धवाः स्वचरत्र प्रातेन वायुना प्रदक्षिणं चितिग्नि विजयेयुः ॥ कर्ता
वामस्कंधारोपितस्य कुंभस्य परशुना छिद्रं कृत्वा तेनोदकधारां पा
दद्देशात् त्रिरप्रदक्षिणं परिषिंचयन् ॥ इमा आपो मधुमत्यो ऽस्मि
न्लोक उपदुह्यंतामिमां ॥ इमा आपो मधुमत्योंतरिक्षं लोक उपदुह्यं
तामि मां इमा आपो मधुमत्यो ऽमुष्मिन्लोक उपदुह्यंतामिमां ॥ ततो माव
तारिषन्पुनरवतारिष्यावहे इति कुंभं भिनत्ति ॥ यथा आपो न तिष्ठंति
तथाभिधेयं ॥ ततः उदीचीं दिशां निष्क्रामंति ॥ उद्वयंतमसस्परि उदु
त्यं जातवेदसमिति द्वाभ्यामादित्यमुपतिष्ठते ॥ ततः चितिमप्रेक्ष्य

दै· वि·
८

माणा बालपुरःसराः पुत्रादयो यत्रापस्तत्र गच्छंति ॥ ततो वपनं का
र्यं ॥ आचम्य० ॥ पितृमरणनिमित्तं वपनं करिष्ये ॥ यानि कानि च
पापानि ब्रह्महत्यासमानि च ॥ केशानाश्रित्य तिष्ठंति तस्मात्केशान्व
पाम्यहं इति पुत्रादयो केशश्मश्रुलोमनखानि वापयति ॥ शिखाक
क्षोपस्थवर्ज्यं ॥ प्रेतपत्न्यापि अलंकारान्स्त्यजेत् ॥ आचम्य भर्तृतीर्थे
वपनं करिष्ये ॥ यानि का० म्यहं ॥ ततः कृतोस्नात्वा एकं अश्रुणं पाषा
णं आदाय उत्तरीयवस्त्रं पवित्रं च धृत्वा आचम्य देशकालौ संकीर्त्य नि
त्कंदन गोत्रस्य राम प्रेतस्य प्रेतत्वविमुक्त्यर्थं पितृत्वप्राप्त्योत्तम
लोकप्राप्त्यर्थं मतादाद्य प्रथमेहनि उदकक्रियां करिष्ये ॥ तदंगम

८

ति कास्नानं करिष्ये ॥ मद्भाशाय सूर्याय दर्शयित्वा ॥ धाता पुना
तु सविता पुनातु ॥ अग्नेस्तेजसा सूर्यस्य वर्चसा ॥ शिरः प्रभृत्यं
गानि विलिप्य स्नात्वा एवं प्रतिदिनं दशाहांतं ॥ ततः कुशोपरि अ
श्मानं प्रतिष्ठाप्य ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य नि
त्कदानि गोत्रस्य राम प्रेतस्य प्रेतत्वनि० प्राप्त्यर्थं दाहजनिततापो
पशमनार्थं अश्मोपरि तिलतोयांजलिरुपतिष्ठतु ॥ उत्तरीयोद
कं पाषाणोपरि निष्पीडयेत् ॥ प्रसृंजलिस्तात्वा ॥ स्नानाशक्ये
तु दर्भमिश्रोदकेन मार्जनं कुर्यात् ॥ अथ पिंडक्रिया उच्यते ॥
ततः स्वगृहे गोष्ठे नदीतीरे वा ताम्रपात्रे मृन्मयपात्रे वा चरुं श्र

पायित्वा ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य निकंदनगोत्रं
स्य राम प्रेतस्य प्रेतत्वविमुक्त्यर्थं पितृलोकप्राप्त्यो उत्तमलोकप्राप्त्य
र्थं पिंडक्रियां करिष्ये ॥ चरुमभिघार्योद्वास्य पिंडमेकं कृत्वा ॥
तूष्णीं भूमिमुल्लिख्यावोक्ष्य ॥ पिंडस्याधो दर्भासनमुपतिष्ठतु
तस्योपरि तिलोदकं उपतिष्ठतु ॥ निकंदनगोत्रस्य रामप्रेतस्य
प्रथमेऽहनि मूर्धावयवनिष्पत्त्यर्थं अयं ते पिंडं उपतिष्ठतु इति च
रोः सुदृढं पिंडं दत्वा ॥ प्रेतपिंडाय अंजनं उ॰ प्रेतपिं॰ अभ्यंजनं
उ॰ गंध उ॰ तुलसी भृंगराज उ॰ नैवेद्यमु॰ ताम्बूल॰ दक्षिणा उ॰
लेपोदकमु॰ तिलोदक॰ सर्वोपचारार्थे तिलाः उपतिष्ठंतु

अनादिनिधनो देवः शंखचक्रगदाधरः ॥ अक्षय्यं पुंडरीकाक्ष प्रेततृ
प्तिप्रदो भव ॥ इदं पिंडदानं सकुश तिलोदकं प्रेताप्यायनमस्त्विति
भवंतो ब्रुवंतु ॥ प्रेताप्यायनमस्तु इति ब्राह्मणा ब्रूयुः ॥ अभिरम्य
तां ॥ अभिरम्यतास्म ॥ इहलोकं परित्यज्य गतोसि परमां गतिं ॥
मनसा वायुरूपेण पिंडे त्वां योजयाम्यहं ॥ पिंडं जले प्रवाहयेत् ॥
उत्तरीशिलाकूर्चपात्रकर्तृ पक्व द्रव्यस्थानविपर्ययं न कुर्यात् ॥
अथ नग्नप्रच्छादनश्राद्धं ॥ कर्ता आचम्य प्राणानायम्य देशका
लौ संकीर्त्य निकंदनगोत्रस्य रामप्रेतस्य प्रेतत्ववि॰ प्राप्त्यर्थं म
नुष्यलोकात्प्रेतलोकं गच्छतः पंथापरिश्रयार्थं नग्नप्रच्छादनश्रा

र्धं करिष्ये॥ ब्राह्मणाभावे दर्भबटौ स्थाप्य॥ तत्र क्षण आसन पाद्य गंध
पुष्पाछादन तूष्णीं तिलैरभ्यर्च्य॥ तस्याग्रे॥ तंदुलवस्त्र उदकुंभदीपलो
हपात्र कांचन लवण तिल मुद्ग कार्पास भूषणानि दक्षिणा उपानहौ निधा
य पंथापरिव्ययार्थं तंदुलादि यथाविभवं द्रव्याणि सर्वाण्युपतिष्ठंतु॥ स
क्तुपिंडमेकं कृत्वा॥ पिंडस्याधो दर्भासनमुपतिष्ठत्वित्यादि प्रेताप्या
यनमस्त्वित्यंतं कृत्वा॥ ततः पिंडसमीपे वस्त्रं निधाय नित्यंदनगो
त्रस्य राम प्रेतस्याछादनार्थे वस्त्रमुपतिष्ठतां॥ तद्ब्राह्मणाय दद्या
त्॥ इति नग्नप्रछादनश्राद्धं॥ अथ नवश्राद्धं॥ स्नात्वा आचम्य
प्राणानायम्य देशकालौ संकीर्त्य नित्यंदनगो॰ स्यार्थं नवश्राद्धं करिष्ये॥

याज्ञिय वृक्षपर्णमादाय तदुपरि दर्भमयं प्रेतस्वरूपं चटं संस्थाप्य॥ नैत्यं
दन गोत्र राम प्रेत विषमश्राद्धे क्षणमुपतिष्ठतु॥ प्रेतस्वरूपिणे चटाय आ
सनं उ॰॥ पाद्य॥ अर्घ्य॥ गंध॥ पुष्प तुलसी भृंगिराज तिलानुपतिष्ठतु॥ नै
वेद्यार्थे अन्नं यथासोपस्करं अ॰ तांबूल दक्षिणा उपतिष्ठतु॥ तस्योपरि
तिलोदकमुपतिष्ठतु॥ ततः तूष्णीं भूमाउ हिदुरव्य अवोक्ष्य॥ पिंडस्याधो
दर्भासनमुपतिष्ठतु तस्योपरि तिलोदकमुपतिष्ठतु॥ चरुपिंडं सुहृदंग
हीत्वा॥ नैत्यंदन गोत्र राम प्रेत विषमश्राद्धे अयं ते पिंड उपतिष्ठतां॥
अंजनाभ्यंजनादि प्रवाहणचालनादि पिंडविध्यनुसारेण सर्वं कुर्यात्॥
आमपक्षे॥ इदं आमं यथासोपस्करं॥ विषमश्राद्धे सक्तुपिंड उपतिष्ठ

त्वित्यूहः कार्यः अन्यत्सर्वं पूर्ववत् ॥ इति विषमश्राद्धं ॥ ॥ पर्वतमालो
क्य ग्रामं प्रविश्य गृहद्वारे निंबपत्राणि भक्षयित्वाऽश्मनि पदं कृत्वा बाल
पुरःसरा गृहं प्रविशेयुः ॥ ततो गोमयेनोपलिप्तायां भूमावुष्मोदकयुक्तां
स्तंडुलान्प्रकीर्य गृहस्थानां मनुष्यगवानां शुभं भवतु ॥ ज्योति भत्या
गारं कुर्वंति ॥ प्रथमदिनादारभ्य दशमदिनपर्यंतं आकाशे शिक्यद्व
ये उदकं क्षीरं च पृथक् पृथक् निधाय दीपं च भूमौ निधाय प्रेत अत्र स्ना
हि इदं पिब ॥ इदं ते ज्योतिरुपतिष्ठतु ॥ भोजनान्नात् मुष्टिमितमन्नं
च दीपसंनिधौ निधाय क्षुधोपशमनार्थमन्नं तवोपतिष्ठतु इति
दशाहं दद्यात् दशदिनपर्यंतं भोजनस्थानविपर्ययो न कार्यः ॥ १०

हविष्यान्नमेव भुंजीरन् ॥ दशदिनपर्यंतं पुनर्भोजनगंधताम्बूलक
ज्जलैकशय्या ज्ञातयः पुरुषास्त्रियश्च वर्जयेयुः ॥ भूमावेव पृथक् पृ
थक् शयीरन् ॥ कर्मांतु पतितपाखंडादिसंभाषणं न कर्तव्यं ॥ तस्मिन्
दिने गृहे पाको न कर्तव्यः ॥ क्रीतं सुहृद्भ्यो लब्धं वाऽश्नीयुः ॥ गोत्रजा
नां तद्दिने तद्गृह एव भोजनं ॥ आमिषलवणापर्युषितमिष्टान्नापू
परसूपपायसादि न दद्युः ॥ समाप्तं प्रथमदिनकृत्यं ॥ ॥ अथ द्वि
तीयदिनकृत्यं ॥ ॥ पूर्वदिने स्वीकृतदेशं गत्वा उत्तरीयवस्त्रं धृ
त्वा स्नात्वा पवित्रपाणिः आचम्य प्राणानायम्य देशकालौ संकीर्त्य
निर्त्यं दन गोत्रै रामप्रेतस्य प्रेतत्वविमुक्त्यर्थं पितृलोकप्राप्त्यातम
स्य

लोकप्राप्त्यर्थं द्वितीयेहनि उदकक्रियां करिष्ये ॥ तदंगं मृत्तिकास्नानं च क
रिष्ये ॥ मृत्तिकास्नानं तिलांजलिदानं च पूर्ववत्कृत्वा ॥ अवयवपिंडं तु च
क्षुश्रोत्रनासिकावयवेन पिंडदानं पूर्ववत्समाप्य स्नात्वा गृहमागत्य ॥ मा
नसीं उर्ध्वांतिसंध्यां कृत्वा उदकं क्षीरं च भूमौ दीपमन्नं च पूर्वोक्तप्रथमदिन
वद्दत्वा स्वयं बंधुभिः सह भुंजीत ॥ इति द्वितीयदिनकृत्यं समाप्तं ॥ ॥
अथ तृतीयदिनविधिः ॥ प्रातः शौचादिकं निवर्त्य ॥ स्वीकृतदेशं गत्वा
॥ उत्तरीयवस्त्रं धृत्वा स्नात्वा पवित्रपाणिः ॥ आचम्य प्राणानायम्य देश
कालौ संकीर्त्य ॥ निसंकंदनगोत्रस्य रामप्रेतस्य प्रेतत्वविमुक्त्यर्थं पि
तृलोकप्राप्त्योत्तमलोकप्राप्त्यर्थं तृतीयेहनि उदकक्रियां करिष्ये ॥ त

दंगं मृत्तिकास्नानं करिष्ये ॥ मृत्तिकास्नानं तिलांजलिदानं च पूर्ववत्कृत्वा
अवयवपिंडं तु भुजौ वक्षग्रीवावयवेन पिंडदानं समाप्य ॥ विषमदिनत्वा
द्विषमश्राद्धमपि प्रथमदिनवत्कृत्वा स्नात्वा ॥ ॥ अथास्थिसंचयनं
॥ ततः अन्नं कृत्वा निधृतं क्षीरं गोमूत्रं गोमयं दहती फलं कुशातीलान्
औदुंबरशाखां ऊर्णासूत्रं कलशांश्चादाय दहनभूमिं गत्वा शवाग्निनष्टश्रे
रप्रायश्चित्तपूर्वकाग्निं विधाय संचयनं कुर्यात् ॥ अस्थ्यां श्वशूकरश्वशादि
स्पर्शे शालग्रामतुलस्युदकेन प्रोक्ष्य प्रायश्चित्तं कुर्यात् ॥ तद्यथा ॥ कृ
तो आचम्य प्राणानायम्य देशकालौ संकीर्त्य ॥ निसंकंदनगोत्रस्य रामप्रे
तस्य शवाग्निनाशप्रायश्चित्तं करिष्ये ॥ शन्नो देवीति मंत्रेण भस्म

नासमिधं स्पृस्वा विधिल्लौकिकमग्निं प्रतिष्ठाप्य॥ आजुह्वानः सुप्र॰
सीदता॥ उद्बुध्यस्वाग्ने प्रति॰ तंतुमंतं इति द्वाभ्यां मंत्राभ्यां समिध मग्नौ प्र
हस्य कांचनं ब्राह्मणाय दद्यात्॥ ततो दक्षिणाग्रे दर्भैरग्निं परिस्तीर्य पा
त्र प्रयोग काले प्रोक्षणी पात्र माज्यस्थालीं स्रुवं च प्रयुज्य स्रुव संमार्ज
नाज्य संस्कारांतं कृत्वा अग्निं परिषिच्य स्रुवेणाज्याहुतीर्जुहुयात्॥ अ
याश्चाग्नेस्यन॰ भेषजं स्वाहा॥ अयसेग्नय इदं न म॰॥ अग्निर्होता॥ अ
श्विनाध्वर्यू॰ तातापेर्ह्वनश्रुतस्वाहा॥ अग्नये पंचहोत्र इदं॰॥ ब्राह्मण
एकहोता॥ स यज्ञः॥ स मे ददातु प्रजां पशून्पुष्टिं यशः॥ यज्ञश्च मे भूया
त्स्वाहा॥ ब्राह्मणाय एकहोत्र इदं॥ अग्निर्द्विहोता॥ स भर्ता॥ स मे

ददातु॰ यशः॥ भर्ता च मे भूयात्स्वाहा॥ अग्नये द्विहोत्र इदं॥ पृथिवी त्रिहो
ता॥ स प्रतिष्ठा॥ स मे ददा॰ यशः॥ प्रतिष्ठा च मे भूयात्स्वाहाः॥ पृथिव्यै
त्रिहोत्र्या इदं॰॥ अंतरिक्षं चतुर्होता॥ स विष्ठाः॥ स मे ददा॰॥ यशः॥ वि
ष्ठाश्च मे भूयात्स्वाहा॥ अंतरिक्षाय चतुर्होत्र इदं॰॥ वायुः पंचहोता॥ स
प्राणः स मे ददा॰ यशः॥ प्राणश्च मे भूयात्स्वाहाः॥ वायवे पंचहोत्र इदं॰
॥ चंद्रमाः षड्ढोता॥ स ऋतून्कल्पयाति स मे ददा॰ यशः॥ ऋतवश्च मे क
ल्पंतां स्वाहाः॥ चंद्रमसे षड्ढोत्र इदं॰॥ अन्नं सप्तहोता॥ स प्राणस्य
प्राणः॥ स मे ददा॰॥ प्राणस्य च मे प्राणो भूयात् स्वाहा॥ अन्नाय स
प्तहोत्र इदं॰॥ द्यौरष्टहोता॥ सोनाधृष्यः॥ स मे ददा॰ यशः॥ अनाधृ

ष्यश्च भूयासꣳ स्वाहा ॥ दिव अष्टहोत्र इदं० ॥ आदित्यो न वहोता ॥ स तेज
स्वी ॥ स मे ददा० यशः ॥ तेजस्वी च भूयासꣳ स्वाहा ॥ आदित्याय न वहोत्र
इदं० ॥ प्रजापतिर्दशहोता ॥ स इदꣳ सर्वं ॥ स मे ददा० यशः ॥ सर्वं च मे भू
रस्वाहा ॥ प्रजापतेर्दशहोत्र इदं० ॥ मनो ज्योतिर्जुषता० घ्रतेन स्वाहा ॥ उ
षसे निम्रुच इदं० ॥ पुनरग्निश्चक्षु० क्ष्योः स्वाहा ॥ मित्रवते अग्नय इदं० ॥ भू
रग्नये च पृथिव्यै च महते च स्वाहा ॥ अग्नये पृथिव्यै महत इदं० ॥ भुवो वा
यवे चांतरिक्षाय च महते च स्वाहा ॥ अंतरिक्षाय वायवे महत इदं० ॥ स्वर्वा
दित्याय च दिवे च महते च स्वाहा ॥ आदित्याय दिवे महत इदं० ॥ भू
र्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा ॥ चंद्र १३

मसे नक्षत्रेभ्यो दिग्भ्यो महत इदं० अनाज्ञातं य० यथातथꣳ स्वाहा ॥ अ
ग्नय इदं० यत्पाकत्रा मनसा दी० यजाति स्वाहा ॥ अग्नय इदं० भूः स्वाहा अ
ग्नय इदं० भुवः स्वाहा वायव इदं० सुवः स्वाहा सूर्यायेदं० भूर्भुवः सुवः स्वाहा
प्रजापतय इदं० ॥ इमं मे वरुण० के स्वाहा । वरुणाये० तत्त्वा यामि० षी स्वाहा
वरुणाये० त्वन्नो अग्ने वरु० ध्यस्मत् स्वाहा । अग्नीवरुणाभ्यामि० ॥ स त्वन्नो
अग्ने व० एधि स्वाहा । अग्नीवरुणाभ्यामि० ॥ त्वमग्ने अयास्य० षजꣳ
स्वाहा । अग्नय इ० ॥ तंतुं तन्वन् रज० नꣳ स्वाहा । तंतुमतेग्नय० ॥ इति द्वा
त्रिंशदाहुतिर्हुत्वा ॥ ~~स्रुवमग्नौ प्रहृत्य~~ ॥ उत्तरपरिषेचनं नास्ति ॥ एव
मग्निसिद्धिं कृत्वा ॥ आचम्य देशकालौ संकीर्त्य नित्यं दन गोत्रस्यरा

यसे

हो. वि.
१४

ममैतस्य प्रेतत्वविमुक्त्यर्थं पितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थं अस्थिसंच
यनं करिष्ये ॥ यं ते अग्निममंथाम वृषभायेव पक्तवे ॥ इमं तं शमया
मसि क्षीरेणाचोदकेन च ॥ यं त्वमग्ने समदहस्त्वमु निर्वापया पुनः ॥
क्याम्बूरत्र जायतां पाकदूर्वा व्यल्कशा ॥ शीतिके शीतिकावति ह्ला
दुके ह्लादुकावति ॥ मंडूक्या सु संगमय इमं स्वग्निं शमय ॥ शं ते
धन्वन्या आपः शमु ते संत्वनूक्याः ॥ शं ते समुद्रिया आपः शमु ते सं
तु वर्ष्याः ॥ शं ते स्रवंतीस्तनुवे शमु ते संतु कूप्याः ॥ शं ते नीहा
रो वर्षतु शमु पृष्वावशीयतां ॥ एतैः पंचभिर्मंत्रैः उदुंबरशा
खाभिः क्षीरमिश्रोदकेन दग्धान्यस्थीन्यवोक्षयेत् ॥ ततो दक्षिण

तोंगारान्निरूह्य तस्मिंस्तिस्र आहुतीर्जुहोति एभिर्मंत्रैः ॥ अवसृज पुन
रग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः ॥ आयुर्वसान उपयातु शे
षः संगच्छतां तनुवा जातवेद स्वाहा ॥ अग्नये जातवेदस इदं ॥ सं
गच्छस्व पितृभिः संस्वधाभिः समिष्टापूर्तेन परमे व्योमन् ॥ य
त्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवः सविता दधातु स्वाहा ॥ देवाय स
वित्र इदं ॥ यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ॥
अग्निष्टद्विश्वादनृणं कृणोतु सोमश्च यो ब्राह्मणमाविवेश स्वाहा
॥ अग्नीषोमाभ्यामिदं ॥ इति हुत्वा दर्वीमाज्यस्थालीमग्नौ त्य
क्त्वा ॥ ततः विषमैरुदकुंभैः सम्यगवोक्ष्य ॥ वामहस्तेन नीललो

ह्नै·वि·
३५

हितसूत्रे वृहती फलमाबध्य चितेर्दक्षिणतः उत्तमानि वामपार्श्वानि
धाय अवलोकयेत्॥ उत्तिष्ठातस्तनुवं संभरस्व मेह गात्रमवहा
मा शरीरं॥ यत्र भूम्यैवृणसे तत्र गच्छ तत्र त्वा देवः सविता दधा
तु॥ इतिदं तेभ्यः शिरसो वाउध तान्यस्थीनि वाससी कुंभे वा निद
धाति॥ इदंत एकं॥ इति मंत्रेण बाहुभ्यां स्कंधाभ्यां॥ परउत एकं॥ इति
पार्श्वाभ्यां श्रोणीभ्यां तृतीयेन ज्योतिषा संविशस्व॥ इति मंत्रेण ऊ
रुभ्यां जंघाभ्यां॥ संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे स
धस्थे इति पद्भ्यां॥ सुसंचितमुपसंचित्य शेषं चिताभस्मापं श्लोति
शिष्टाचारात्॥ सुसंचितान्यस्थीनि शीतलाछायां विधाय॥ दह

नदेशे हस्तमात्रं दक्षिणाग्रं त्रिकोणां वेदीं विधाय गोमयेनोपलिप्य
हरिद्रयाद्यलंकृत्य तत्र कुंभो परि वक्ष्यमाणप्रकारेण पिंडं दद्यात्॥
ततः आचम्य तिथ्यादिसंकीर्त्य निस्तुंदनगोत्रस्य रामप्रेतस्य प्रेत
त्वनिवृत्त्यर्थं पितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थं अस्थिसंचयनांगभू
तं स्मशानबलिं करिष्ये॥ वेदीदक्षिणतः प्रेतरूपकुशमयचटं प्रति
ष्ठाप्य॥ प्रेतायक्षणमुपतिष्ठतु॥ पाद्यमुपतिष्ठतु॥ आचमनमुपतिष्ठ
तु॥ स्नानमुपतिष्ठतु॥ गंधतुलसीभृंगीराजपत्राण्युपतिष्ठंतु॥
प्रेतस्य क्षुधानिवारणार्थं इदं आमं यथास्तोपस्करं अन्नरूपेणो
पतिष्ठतु॥ प्रेताय तांबूलमुपतिष्ठतु॥ दक्षिणामुपतिष्ठतु॥ सर्वो

चतुष्टय

पचारार्थे तिलाः उपतिष्ठंतु ॥ अथ पिंडदानं ॥ सुश्रितं चरु पिंडमा
मादाय ॥ नि सुंदरनगोत्रस्य राम प्रेतस्य प्रेतत्वानि वृत्त्या उत्तम लोक प्रा
स्त्यर्थं वेधु परि चरु पिंड प्रदानं करिष्ये ॥ मध्ये प्रेताय इदमासनं ॥ द
क्षिणतो यमाय इदमासनं ॥ उत्तरे रुद्राय इदमासनं ॥ पश्चिमे वा
यसेभ्यः इदमासनं ॥ तिलोदकं कृत्वा ॥ मध्ये प्रेताताय सोद कुंभ ध्वज
पोलिका छत्र पादुका सहित अयं चरु पिंड स्तवो पतिष्ठतु ॥ तीलोदक
मुपतिष्ठतु ॥ दक्षिणतो यमाय सोद कुंभ ध्वज छत्र पादुका पोलि
का सहित अयं चरु पिंड स्तवो पतिष्ठतु ॥ तिलोदक मुपातिष्ठतु ॥
उत्तरे रुद्राय सोद कुंभ ध्वज छत्र पादुका पोलिका सहित अ १६

यं चरु पिंड स्तवो पतिष्ठतु ॥ तिलोदक मु० ॥ पश्चिमे वायसेभ्यः सोद कुंभ
ध्वज छत्र पादुका पोलिका सहित अयं चरु पिंड स्तवोपतिष्ठतु ॥ तिलो
दक मुपतिष्ठतु ॥ लेपोदक मुपतिष्ठतु ॥ वासोदक मुपतिष्ठतु ॥ अंजनाभ्यं
जन मुपतिष्ठतु ॥ गंध माल्य तुलसी भृंगिराज पत्राण्युपतिष्ठंतु ॥ शोषनैवेद्यतु ॥
फल तांबूल दक्षिणा उपतिष्ठंतु ॥ सव्येन गायत्र्यार्चनमुपतिष्ठतु ॥ अपस
व्यं ॥ प्रार्थयेत् ॥ येत्र स्मशानदेवाः स्तु भगवंतः सनातनाः ॥ ते ऽस्मत्सकाशं
गृण्हंतु बलिमष्टांगमक्ष्ययं ॥ प्रेतस्यास्य शुभान् लोकान्प्रयच्छंतु च
शाश्वतान् ॥ अस्माकमायुरारोग्यं त्वत्प्रसादात् सुखानि चेति ॥ गोमूत्रे
णाहस्तौ प्रक्षाल्य ॥ उत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व परमे व्योमन् ॥ यमेन

त्वं यस्यासंविदानोत्तमं नाकमधिरोहेममित्युपतिष्ठते ॥ ततः वायसपिं
डं वायसो यावद्गृह्णीयात्तावत्तिष्ठेत् ॥ वायसस्पर्शने विलंबश्चेत्तदा दर्भम
यं वायसं कृत्वा स्पर्शयेत् ॥ ततः पृथिव्यास्तां प्रक्षिप्य ॥ अपामोषधीना
ं रसेन स्वर्गे लोके भिवपामि रामप्रेतेति ॥ वट अश्वत्थ बिल्व मूले अव
टं खात्वा तत्रावटे हिरण्यं सर्वौषधी तिल उदकं च प्रक्षिप्य ॥ अस्थि
कुंभमादाय अवटे निदधाति मृत्तिकया छाद्य दृढं कृत्वा ॥ इति अस्थि
संचयनविधिः ॥ अथवा तीर्थसांनिध्ये सति संचयनान्यस्थीनि तीर्थे
क्षिपेत् ॥ तदाह उत्तं दशाहे यस्यास्थि गंगायां यदि मज्जति गंगायां
मरणं यद्वत् तद्वत् पुण्यं लभेद्ध्रुवं ॥ संचयनश्राद्धं विषमश्राद्धवत्कृ

त्वा ॥ स्नात्वा गृहमागत्य ॥ उदकं क्षीरं दीपमन्नं च पूर्ववद्दत्वा स्वयं भुंजी
त समाप्तं ॥ तृतीयदिनकृत्यं ॥ ॥ अथ चतुर्थदिनकृत्यं ॥ पूर्वदिने स्थी
कृतदेशे गत्वा ॥ उत्तरीयवस्त्रं धृत्वा स्नात्वा आचम्य पवित्रपाणिः दे
शकालौ संकीर्त्य नित्यं दनगोत्रस्य राम प्रेतस्य प्रेतत्वनि॰पि॰ल॰प्त्य
र्थं चातुर्थदिनविधिं करिष्ये ॥ तदंगं मृत्तिकास्नानं करिष्ये ॥ मृत्तिका
स्नानं तिलांजलिदानं च पूर्ववत्कृत्वा ॥ अवयवपिंडे पादहस्ते कुक्षि
कटि नाभि गुद लिंग अवयवेन पिंडदानं समाप्य ॥ स्नात्वा गृहमागत्य
उदकं क्षीरं च भूमौ दीपमन्नं च पूर्वोक्त प्रथमदिनवद्दत्वा स्वयं भुंजी
तेति चातुर्थदिनकृत्यं समाप्तं ॥ अथ पंचमदिनविधिः ॥ प्रातः

शौचादिकं निवर्त्य ॥ स्वीकृतदेशं गत्वा ॥ उत्तरीयवस्त्रं धृत्वा स्नात्वा ॥
पवित्रपाणिः ॥ आचम्य प्राणानायम्य ॥ देशकालौ संकीर्त्य निस्कंदन
गोत्रस्य राम प्रेतस्य प्रेतत्वविमु॰ पितृ॰ प्रा॰ प्त्यर्थं मृताहात्पंचमे ह
नि उदकक्रियां करिष्ये ॥ तदंगं मृत्तिका स्नानं करिष्ये ॥ मृत्तिकास्ना
नं तिलांजलिदानं च पूर्ववत्कृत्वा ॥ अवयवपिंडे तु ॥ ऊरुजानु
जंघावयवेन पिंडदानं पूर्ववत्समाप्य पंचमदिने त्वाह्निकमश्रा
द्धं प्रथमदिनवत्कृत्वा ॥ स्नात्वा संध्यां कृत्वा गृहमागत्य उदकं क्षी
रं च भूमौ दीपमन्नं च पूर्वोक्तप्रथमदिनवद्दत्वा स्वयं भुंजीतेति पंचमदि
न कृत्यं समाप्तं ॥ ॥ अथ षष्ठदिनविधिः ॥ प्रातः उत्थाय शौचादि

कं निवर्त्य स्वीकृतदेशं गत्वा ॥ उत्तरीयवस्त्रं धृत्वा स्नात्वा आचम्य पवित्रपा
णिः देशकालौ संकीर्त्य निस्कंदन गोत्रस्य राम प्रेतस्य प्रेतत्वविमु॰ पि
तृ॰ प्राप्त्यर्थं मृताहात्षष्ठेहनि उदकक्रियां करिष्ये ॥ तदंगं मृत्तिकास्ना
नं करिष्ये ॥ मृत्तिस्नानं तिलांजलिदानं च पूर्ववत्कृत्वा ॥ अवयवपिंडे
तु गुल्फ पादांगुलिमर्मावयवयवेन पिंडदानं समाप्य स्नात्वा ॥ अर्घ्यांत
मानसीं संध्यां समाप्य गृहमागत्य उदकं क्षीरं च भूमौ दीपमन्नं च पूर्ववत्प्र
थमदिनवद्दत्वा स्वयं भुंजीतेति षष्ठदिन कृत्यं समाप्तं ॥ ॥ अथ सप्त
मदिन कृत्यं ॥ प्रातः शौचादिकं निवर्त्य ॥ स्वीकृतदेशं गत्वा ॥ उत्तरीयव
स्त्रं धृत्वा स्नात्वा ॥ आचम्य पवित्रपाणिः प्राणानायम्य देशकालौ संकी

र्यनिसुदन गोत्रस्य राम प्रेतस्य प्रेतत्वानिवृत्त्यर्थं पितृत्व॰ स्यर्थं मृताहात्सप्तमेहनि उदकक्रियां करिष्ये तदंगं मृत्तिकास्नानं करिष्ये॥ मृत्तिकास्नानं तिलांजलिदानं च पूर्ववत् कृत्वा॥ अयवपिंडेनु अस्थिमज्जावयवेन पिंडदानं समाप्य॥ विषमदिनत्वाद्विषम आद्यमपि प्रथमदिनवत् कृत्वा स्नात्वा गृहमागत्य उदकक्षीरं च भमोदीपमन्नं च पूर्वोक्तप्रथमदिनवद्दत्वा॥ स्वयं भुंजीत॥ इति सप्तमदिनकृत्यं॥ अथ अष्टमदिनकृत्यं॥ प्रातः शौचादिकं निवर्त्य॥ स्वीकृतदेशं गत्वा॥ उत्तरीयवस्त्रं धृत्वा पवित्रपाणिः॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य निसुदन गोत्रस्य राम प्रेतस्य प्रेतत्वनिवृत्त्यर्थं पितृत्वप्राप्त्योत्त

मलोकप्राप्त्यर्थं मृताहात् अष्टमेहनि उदकक्रियां करिष्ये॥ तदंगं मृत्तिकास्नानं करिष्ये॥ मृत्तिकास्नानं तिलांजलिदानं च पूर्ववत् कृत्वा॥ अयवपिंडदाने तु नखरोमाद्यवयवेन पिंडदानं समाप्य स्नात्वा गृहमागत्य उदकक्षीरं च पूर्वोक्तप्रथमदिनवद्दत्वा स्वयं भुंजीत॥ इत्यष्टमदिनकृत्यं॥ ॥ अथ नवमदिनकृत्यं॥ प्रातः शौचादिकं निवर्त्य स्वीकृतदेशं गत्वा॥ उत्तरीयवस्त्रं च धृत्वा स्नात्वा पवित्रपाणिः आचम्य देशकालौ संकीर्त्य निसूदन गोत्रस्य राम प्रेतस्य प्रेतत्वनिवृत्त्यर्थं पितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थं मृताहात् नवमेहनि उदकक्रियां करिष्ये॥ तदंगं मृत्तिकास्नानं करिष्ये॥ मृत्तिकास्नानं तिलांजलिदानं

और्ध्व·दि·
२०

चस्वीकृतपक्षानुसारेण प्रथमदिनवत् कृत्वा॥ अवयवपिंडेतु सर्वा
वयवानिष्पत्त्यर्थं एषतेपिंड उपतिष्ठतु॥ एवं प्रकारेण पिंडदाने स
माप्य विषमदिनत्वाद्विषमश्राद्धमपि प्रथमदिनवत् कृत्वा स्नात्वा गृह
मागत्य उदकक्षीरं दीप अन्नं च पूर्ववद्दत्वा स्वयं भुञ्जीत॥ इति नवमदिन
कृत्यं॥ अथ दशमदिनकृत्यं॥ प्रातः शौचादिकं निवर्त्य॥ स्वीकृतदेशं
गत्वा॥ उत्तरीयवस्त्रं धृत्वा स्नात्वा पवित्रपाणिः आचम्य देशकालौ
संकीर्त्य निरुद्दनगोत्रस्य रामप्रेतस्य प्रेतत्वनिवृत्त्यर्थं पितृलोकप्राप्त्यो
त्तमलोकप्राप्त्यर्थं भवतां हात्दशमेहनि उदकक्रियां करिष्ये॥ तदंगम
त्रिकालस्नानं करिष्ये॥ मानिका स्नानं तिलांजलिदानं च पूर्ववत् कृत्वा॥ २०

अवयवपिंडदाने क्षुत्पिपासानिवृत्त्यर्थं अनेनावयवेन पिंडदानं समाप्य॥
ततः वेदिकोपरि वायसबलिः॥ आमलकं तैलं चत्वारः कलशान् ध्वजान् पोलि
का पादुका छत्राणि गोमयं हरिद्रां आसाद्य॥ अद्येत्यादि फ॰ र्थं मम पितुः म
रणनिमित्तं सूतकनिवृत्त्यर्थं वपनं करिष्ये॥ पुत्रादयः वपनं कृत्वा॥ यानि कानि
च पापानि ब्रह्महत्यासमानि च केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्य
हं॥ वाप्य स्नात्वा॥ त्रिकोणा वेदिं कृत्वा गोमयेनोपलिप्य हरिद्रादिनालंकृ
त्य कुंभचत्वारि तिलोदकपूरितानि धाय॥ मध्ये प्रेताय इदमासनं॥ द
क्षिणतो यमाय इदं॥ उत्तरे रुद्राय इदं॥ पश्चिमे वायसेभ्यः इदमासनं॥
तिलोदकं कृत्वा॥ मध्ये प्रेताय सोदकुंभध्वजछत्रपादुकापोलिकासहि

हौ॰ वि॰
२१

त अयं चरुपिंडस्तवोपतिष्ठतु ॥ तस्योपरि तिलोदकमुपतिष्ठतु ॥ दक्षिण
तो यमाय सोद॰ अयं चरुपि॰ ॥ उत्तरे रुद्राय सोदकं॰ ॥ पश्चिमे वायसेभ्यः
सो॰ अयं चरुपि॰ तस्यो॰ तिलोद॰ तु ॥ पूर्ववत् पूजां विधाय ॥ वायसपिंडं
काकैर्भक्षयित्वा तावत् कर्ता तत्र तिष्ठेत् ॥ काकस्पर्शानंतरं ॥ अश्मानं ते
लामलकं लापयित्वा ॥ तैलामलकं आत्मनश्च लापयित्वा ॥ सर्वैः स्त्रि
या सह लापयेत् ॥ अश्मोपरि पूर्ववत् तिलोदकं दत्वा ॥ एषवोनु
गतः प्रेतः पितृत्वमस्य मवाप्नुयात् ॥ शिवं भवतु शेषाणां जायतां चिर
जीविता ॥ अश्मानं जले स्थाप्य ॥ स्नापयेत् ॥ इति दशमदिनकृत्यं ॥ ॥
अथैकादशदिनकृत्यं ॥ प्रातः स्मशानांभांडानां स्पृष्टवस्त्राणां प्रक्षा

लनं गृहानुलेपनं च कृत्वा स्नात्वा पंचगव्यं कृत्वा प्राश्नीयात् ॥ ततः विषम
श्राद्धं पूर्वोक्त प्रथमदिनवत् पिंडदानविसर्जनांतं कृत्वा ॥ आमपक्षे इदं
आमं यथासोपस्करं इदं सक्तुपिंडमुपतिष्ठतामित्यूहः कार्यः ॥ इतिवि
षमश्राद्धं ॥ अथ दशदानानि ॥ दानप्रकारमाह ॥ कर्ता आचम्य ॥ प्रा
णानायम्य देशकालौ संकीर्त्य निर्युंदनगोत्रस्य राम प्रेतस्य प्रेतत्वनि॰
स्योत्तमलोकप्राप्त्यर्थं पितुः समस्तपापक्षयार्थं मार्गे सुखप्राप्त्यर्थं ए
कादशेहनि गवादि दशदानानि करिष्ये ॥ गोः प्रतिग्रहीत्रे ब्राह्मणाय इ
दमासनं॰ संपूज्य ० धारिणेनमः ॥ स्वस्ति अस्तु ॥ गवामंगेषु तिष्ठंति भु
वनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥ १ ॥
यज्ञसाधनभूता या विश्वस्याघौघनाशिनि ॥ विश्वरूपधरो देवः प्रीयतामन
या गवा ॥ इदं गोनिष्क्रय द्रव्यं दक्षिणा तांबूल
सहितं केशव शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥
तेन श्रीप्रेत यमोक्षदाता महाविष्णुः प्रीयतां ॥

प्रत्यक्षगोदानेतु ब्राह्मणवर्णनं पूजनं गोःपूजनं दानंच पापधेनुदानं पूर्वो
क्तप्रकारे णाद द्यात् ॥ भूमिगोदानं ॥ ३ ॥ भूः ॥ भूः प्रतिगृहीत्रे ॥ ब्राह्मणा
य इदमासनं॰ धारिणेनमः ॥ स्वस्त्यस्तु ॥ सर्व सस्याश्रयाभूमिर्वराहे
णासमुध्धृता ॥ अनंतसस्य फलदा अतः शांतिं प्रयच्छमे ॥ इदं भू

निष्क्रयद्रव्यं दक्षिणा तांबूलसहितं नारायणशर्मणे॰ प्रेतापमोक्षदाता महाविष्णुः
प्रीयतां ॥ संतितसंभवे प्रत्यक्षं भूदानं कृत्वा ॥ २ ॥ एवमेव ब्राह्मणपूजन
पूर्वकं तत्तन्मंत्रेण दानानि दद्यात् ॥ अथतिल ॥ महर्षेर्गोत्रसंभूता
कश्यपस्यतिलास्मृताः ॥ तस्मादेषांप्रदानेन ममतःशांतिं प्रयच्छमे ॥ ३ ॥
हिरण्यं ॥ हिरण्यगर्भ॰ छमे ॥ ४ ॥ आज्यं ॥ कामधेनुषु संभूतं सर्वक्र

ततः प्रेतमुक्तिद्वारामया कृतेन वृषोत्सर्गाख्येनकर्मणा तेन श्री महाविष्णुः प्री
यतां ॥ इतिवृषोत्सर्गः ॥ ॥ अंधत्व मूकत्व बधिरत्व पिशाचत्व नि
वारणार्थ दानानि ॥ कर्ता आचम्य प्राणानायम्य देशकालौ संकी
र्त्य नित्यं दनगोत्रस्य राम प्रेतस्य प्रेतत्व नि वृ॰ अनेकजन्मार्जित दु
रित अंधः कारादि भयनिवारणार्थं तथाच परान्योन्य स्त्रीपुरुष
एकांतभाषणश्रवणजन्य बधिर्यादि निवारणार्थं तथाच देवब्राह्म
गुरुनिंदाजन्य मूकत्व भयनिवारणार्थं तथाच स्ववर्णाश्रमधर्मत्या
गजन्य पिशाचादि दुर्योनिप्राप्तभयनिवारणार्थं पापापहा महावि
ष्णुप्रीत्यर्थं दीपघंटापुस्तक शालिग्राम शिलादानानि करिष्ये ॥

तथाच ब्राह्मणपूजनंच करिष्ये॥ दीपप्रतिग्रहित्रे ब्राह्मणाय इदमासनं॥
गंधादिपूजनं कृत्वा॥ दानमंत्रः॥ मेधावी ज्ञानसंपन्नश्चक्षुष्मान्निरुजायते॥
दीपदानेन राजेंद्र चक्षुष्मा सर्वदा भवेत्॥ इदं दीपदानं दक्षिणाताम्बूलसहितं
ब्राह्मणाय संप्रददे॥ घंटामंत्रः॥ घंटा देवप्रिया नित्यं महानादकरा शुभा॥ सं
प्रदानेन एतस्यात्र्गातिरस्तु चिरं सुखं॥ पुस्तकं॥ सर्वविद्याश्रयं दानं कारणं ललि
ताक्षरं॥ पुस्तकं संप्रदास्यामि प्रीतो भवतु भास्करः॥ शालिग्राममंत्रः॥ शालिग्रा
मशिला पुण्या भुक्तिमुक्तिप्रदायिनि॥ शालिग्रामप्रदानेन मतिः शालिंप्रयच्छमे
॥ इति चतुर्दानानि॥ ॥ अथोपदानानि॥ अन्नं च उदकं चैव कमंडलुरुपानहौ॥
छत्रं वस्त्रं च यष्टीं च लोहदंडमथाष्टमं॥ आसींष्टिकां च दीपं च तैलताम्बूलमेव च॥ च

दनं पुष्पदानं च पंचायतनमेव च॥ माषमुद्गयवव्रीन्गोधूमचणकं तथा॥ पंचामृतं प्र
वालं च सौभाग्यं वायनं तथा॥ नारिकेलफलानादी व्यंजनं दर्पणं तथा॥ तथा आचमनं
कार्यफलप्राप्त्यर्थं गोत्रस्य प्रेतस्य सकलपातकक्षयपूर्वक सुखप्राप्तिद्वारा श्रीपरमे
श्वर प्रीत्यर्थं ब्राह्मणेभ्यः अन्नादि उपदानि करिष्ये॥ तथाच ब्राह्मण पूजनं करिष्ये॥
ब्राह्मणाय आसनादि पूजयित्वा॥ तत्र दानमंत्रः॥ अन्नमेद्यथतो लक्ष्मीरन्नमेव जना
र्दनः॥ अन्नब्रह्माखिलत्राणमस्यास्तु जन्मजन्मनि॥ इमामन्नस्थालीं दक्षिणाताम्बू
लसहितां ब्राह्मणाय संप्रददे॥ उदकपात्रमंत्रः॥ त्रयाणामपि लोकानां उदकं जीवनं स्मृ
तं॥ पवित्रममृतं यस्मात्तेनासौ सुखमाप्नुयात्॥ कमंडलुमंत्रः॥ कमंडलुजलैः पूर्णः स्वर्ण
गर्भः सुलक्षणः॥ अर्पितस्ते महासेन प्रसन्नो स्यततो भव॥ उपानहमंत्रः॥ उपानहौ प्र

दास्यामिकंटकादिनिवारणे॥ सर्वस्थानेषु सुखदा मतः शांतिं प्रयच्छ मे॥ छत्रमंत्रः॥ इहा
मुत्रातु पत्राणं कुरु मे तस्य केशव॥ छत्रं तत्प्रीतये दत्तं ब्राह्मणाय मया शुभं॥ वस्त्रमंत्रः॥ शा
सनं सर्वलोकानां लज्जाया रक्षणं परं॥ सुवेषधारणं वस्त्रमतः शांतिं प्रयच्छ मे॥ यष्टी
मंत्रः॥ येपंगुभ्यश्च पांथेभ्यो दीनेभ्योपि दयालतः॥ यष्टीदानं प्रकुर्वीत नरो गास्तेन
संशयः॥ लोहदंडमंत्रः॥ पतिभ्यो वैणवं दंडं द्विजेभ्योपि स्वमित्रकं॥ प्रदाय सर्वलोके
सौ यमदंडं न गच्छति॥ अग्निष्टिकामंत्रः॥ चैत्ये सुरालये सभा वसमेषु भव्यां येग्नीष्टि
कां प्रचुरकाष्ठवतां प्रदद्युः॥ हेमंतशैशिरऋतौ सुखदा जनानां कार्याग्निदीप्त ममलं
वपुरावहंती॥ दीपमंत्रः॥ दीपदानेन राजेंद्र चक्षुष्मानिह जायते॥ रूपसौभाग्ययु
क्तः सुधनधान्यसमन्वितः॥ तैलमंत्रः॥ तिलाकाश्यप संभूताः क्लिन्नपापहरा २९

स्मृताः॥ तैलदानप्रदानेन शांतिरस्तु सदा मम॥ तांबूलमंत्रः॥ तांबूलं श्रीकरं भद्रं
ब्रह्माविष्णुशिवात्मकं॥ यस्य प्रदानाब्रह्माद्याः शिवं ददतु पुष्कलं॥ चंदनमंत्रः॥ चंद
नावासमंदार सखे वरण रकार्चित॥ चंदनस्य प्रदाने सान्द्रानंद प्रभा भव॥ पुष्पमंत्रः
ल्हादयंति मनो यस्मात्तस्मात्सुमनसः सदा॥ तदाल्हादयं सेनं पुष्पदानं सुखप्रियं
॥१४॥ पंचायतनमंत्रः॥ महाकोशानिवासीनां चक्राधेरूपशोभितं॥ अस्य प्रदा
नात्सफलाः मम संतु मनोरथाः॥ माषादि॥ माषमुद्गयवव्रीहीन् गोधूम चणकांस्त
था॥ प्राणिनां जीवनोपाय मतः शांतिं प्रयच्छ मे॥ पंचामृतमंत्रः॥ पंचामृतं
महादिव्यं सर्वदानोत्तमोत्तमं॥ सर्वदेवसयोग्यं च श्रेयः पुष्टिः प्रयच्छतु॥ प्र
वालमंत्रः॥ भौमिग्रस्तं प्रवालं च सर्वसौभाग्यदायकं॥ भूषणं सर्वशाकी

शौ॰ वि॰
३०

नांत्वं दानं सुखमाप्नुयात्॥ सौभाग्यवायनमंत्रः॥ राजपत्नी महाभागे पुण्यकी
र्तीनिरामये॥ सौभाग्यवायनं दानं लक्ष्मीस्त्वं प्रतिगृह्यतां॥ फलमंत्रः॥
इदं फलं मया०॥ व्यजनमंत्रः॥ पाचिका सर्वजंतूनां चैवसार्द्रं दकरी तथा॥ पितृ
णां तापितानि समतः शांतिं प्रयच्छ मे॥ दर्पणमंत्रः॥ दर्शनेन त्वमादर्शन
णां मंगलदायक॥ शौर्यसौभाग्यसत्कीर्ति निर्मलज्ञानदो भव॥ ऊर्णावस्त्र
मंत्रः॥ निष्कांचनेभ्यो दीनेभ्यः शीतवातमहातपैः॥ आर्चितेभ्यः करुण
यी वस्त्रमौर्णं ददाति यः॥ पुस्तकमंत्रः॥ सर्वविद्याश्रयं ज्ञानं करणं कलि
नाशनं॥ पुस्तकं संप्रयच्छामि प्रीयतां भवतु भारती॥ इक्षुमंत्रः॥ इक्षुदंडम
हापुण्यं रसाढ्यं सर्वकामदं॥ तुभ्यं ददामि तेनाशु प्रीयतां परमेश्वरः॥ अंगु ३०

लीमंत्रः॥ हिरण्यगर्भसंभूतं सौवर्णं चांगुलीयकं॥ धर्मप्रदं प्रयच्छामि प्रीणातु कमला
पतिः॥ अथ पददानं॥ कर्ता आचम्य फलमादाय अद्य गोत्रस्य राम प्रेतस्य महामार्गे अति
कष्टनिवृत्तिपूर्वक उत्कृष्टस्थानगमनसिद्धये प्रेततृप्त्यर्थं च यथाशक्त्या पददानम
हं करिष्ये॥ तथा च ब्राह्मणपूजनं करिष्ये॥ गंधादिना संपूज्य मंत्रः॥ ये प्रयच्छंति विप्रा
य सर्वसंभारसंयुतं॥ अक्षय्यसुखमाप्नोति पददानेन केशव॥ इदं पदं दक्षिणाताम्बू
लसहितं ब्राह्मणाय०॥ आसनोपानहौ छत्रं मुद्रिका च कमंडलुः॥ भाजनं भोजनाधा
रो वस्त्राण्यष्टविधं पदं॥ इति दानानि॥ ॥अथाद्यश्राद्धं॥ कर्ता आचम्य फलमादा
य उत्तरीयवस्त्रं धृत्वा॥ निर्स्कंदन गोत्रस्य राम प्रेतस्य प्रेतत्वनिवृत्त्यर्थं एकादशे
हनि आद्यमासिक आद्याह्निक महैकोद्दिष्टश्राद्धं करिष्ये॥ स्थंडिले अग्निं प्रति
३ आद्यश्राद्धमशुद्धोपि कुर्यादेकादशेहनि॥ कर्तुस्तात्कालिकी शुद्धीरशुद्धिः पुनरेव सः॥१॥ न
नत्र ब्राह्मणाभावे ग्नावेव कार्यं॥ नूतनभांडेष्वन्नादिकं पाचयित्वा॥

ष्ठाप्य प्रज्वाल्य चत्वारिशृंगा० वरदो भव यथाहृतइ० न्न आयुः परिस्तीर्य अदितेनुमन्यस्व। अनु०। सरस्व०। देवसवि०॥ प्राचीनावीति॥ नित्स्कंदन गोत्र रामप्रेतेन्नयेइदमासनं तत्रोपतिष्ठतु॥ पाद्यं· अर्घ्यं· गंध· माल्य· तुलसी· भृंगिरा· धूप दीप· यज्ञो· पूगीफल आच्छादनादि संपूज्य॥ अग्ने रुत्तरतः त्रिकोणं मंडलं कृत्वा॥ तत्रोपरि पात्रे सर्वमन्नमादाय॥ द्वितीयेग्नौ प्रेताग्नौकरणं॥ तूष्णीं परिसमूहनादि कृत्वा॥ नित्स्कंदनगोत्राय राम प्रेताय च स्वाहा॥ पुनः परिसमूहनादि कृत्वा॥ इत्यग्नौकरणं॥ पात्रं गायत्र्या प्रोक्ष्य। सत्यं त्वर्तेन परिषिंचामि पृथिवीते पात्रं द्यौर पिधानं अग्ने स्त्वा मुखे जुहोमि प्राणापानयो र्जुहोम्यक्षितमसि मामेक्षेष्ठा मुत्रा मुष्मिं लोके इदं विष्णु० पा० सुरे॥ नित्स्कंदनगोत्रा रामप्रेताय
य
३१

~~[illegible]~~ इदमिदमन्नं सोपस्करं अमृतरूपेणोपतिष्ठतु॥ आपोशानमुपतिष्ठतु॥ प्राण अपान व्यान उदान समान ब्रह्मण इति प्राणाहुतिं दत्वा॥ सर्वमन्नमेकीकृत्य ग्रासपरिमित अवदानं हस्तेन जुहोति॥ मंत्रः॥ यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः॥ अग्निष्टद्विश्वादनृणं कृणोतु सोमश्च यो ब्राह्मणामाविवेश स्वाहा॥ अग्नीषोमाभ्यामिदं न मम॥ केचित्सोमायेदं न ममेति वदं॥ एवं द्वात्रिंशदाहुतीर्हुत्वा॥ तृप्तिमुपतिष्ठतु॥ उत्तरापोशानमुपतिष्ठतु॥ करोद्वर्तनार्थे चंदनं तांबूल दक्षिणां च दत्वा॥ पिंडं कृत्वा॥ तूष्णीं भूमाउद्दिश्य॥ अवोक्ष्य पिंडस्याधः दर्भासनमुपतिष्ठतु॥ नित्स्कंदनगोत्राय रामप्रेताय आद्यमासिक आद्याब्दिक महैकोदिष्टश्राद्धे अयं चरुपिंडस्तवोप०॥

तिलोदकमुपतिष्ठतु ॥ पूर्ववत्पूजां कृत्वा ॥ अनादिनिध॰ विसर्जयेत् ॥ एषवोनुग॰
विना ॥ इत्यग्निः विसृज्य ॥ ॥ इति एकोद्दिष्टप्रयोगः ॥ ॥ अथ वसुगणश्रा
द्धं ॥ स्नात्वा उत्तरीयवस्त्रं पवित्रं च धृत्वा आचम्य प्रा॰ संकीर्त्य मित्यंदन गोत्रस्य
रामप्रेतस्य प्रेतत्वनि॰ स्यर्थं मृताहादेकादशेहनि आमेन वसुगणश्राद्धं करि
ष्ये ॥ धरो ध्रुवश्च सोमश्च आपश्चैवो निलोनलः ॥ प्रत्युषश्च प्रभासश्च व
सवोष्टौ प्रकीर्तिताः ॥ चटे आसनादि दत्वा ॥ तत्र धरायचटे इदमास
नं ॥ ध्रुवाय॰ सोमाय॰ अद्भ्यः चटे॰ निलाय॰ अनिलाय॰ प्रत्युषा
य॰ प्रभासाय चटे इदमासनं ॥ पाद्य॰ गंध॰ पुष्प॰ तांबू॰ दक्षिणा॰ उपति
ष्ठंतु ॥ इमानि आमान्नानि दक्षिणातांबूलसहितानि ब्राह्मणेभ्यो दातुं ३२

महमुत्सृजे ॥ दत्वा ॥ अनेन वसुगणश्राद्धाख्येन कर्मणा प्रेतायमोक्षदातामहाविष्णुः प्रीय
तां ॥ वसुगणश्राद्धं कृतं ॥ अथ रुद्रगणश्राद्धं ॥ कृतपवित्रपाणिः आचम्य प्राणा॰
संकीर्त्य नित्यंदन गोत्रस्य राम प्रेतस्य प्रेतत्वनिवृत्यर्थं पितृत्वप्राप्त्योत्तमलोकप्राप्त्य
र्थं मृताहादेकादशेहनि अजैकपादादि प्रेतस्वरूपिणो प्रेतोद्देशेन आमेन
रुद्रगणश्राद्धं करिष्ये ॥ अजैकपादहिर्बुध्न्यः कपाली रुद्र एव च ॥ वृ
षाकपिश्च शंभुश्च कपर्दी रैवतस्तथा ॥ हरश्च बहुरूपश्च त्र्यंबकश्चा
पराजितः ॥ अजैकपादे इदमासनं ॥ अहिर्बुध्न्याय इद॰ २ कपाली रुद्रा
य॰ ३ वृषाकपतये इद॰ ४ शंभवे इद॰ ५ कपर्दिने इद॰ ६ रैवताय इद॰ ७
हराये इद॰ ८ बहुरूपाय इद॰ ९ त्र्यंबकाय इद॰ १० अपराजिताय इदमासनं ११ ॥

पाद्य॰ गंध॰ पुष्प॰ मुपतिष्ठतु ॥ इमानि आमान्नानि दक्षिणातांबूलसहितानि ब्राह्मणेभ्यः
दातुमहमुत्सृजे ॥ पिंडदानाभावेऽन्नपाकीसादिनाकरि ॥ अनेन रुद्रगणश्राद्धाख्येन कर्म
णा प्रेताय मोक्षदाता महाविष्णुः प्रीयतां ॥ इति रुद्रगणश्राद्धं ॥ ॥ अथ मासि
कश्राद्धानि ॥ तन्नु सपिंडीकरणाधिकारार्थं एकादशे द्वादशे हनि वा ॥ कर्ता
उत्तरीयवस्त्रं धृत्वा स्नात्वा पवित्रपाणिः आचम्य प्राणानायम्य देशकालौ
संकीर्त्य नित्कंदनगोत्रस्य रामप्रेतस्य प्रेतत्व॰ स्यर्थं सपिंडी अधिकारार्थं उ
न्मासिकादि ऊनाद्विकांतानि पंचदशमासिकानि अपकृष्य एकतंत्रेण एको
द्दिष्टविधिना करिष्ये ॥ तत्र पंचदश चयान् संस्थाप्य ॥ नित्कंदनगोत्र रामप्रे
त ऊन्मासिकश्राद्धे चटे इदमासनमुपतिष्ठतु ॥ एवं द्वितीयादि ॥ द्वितीयमासिक॰ ॥ ३३

त्रैपक्षिक॰ तृतीयमासिक॰ चतुर्थमासिक॰ पंचममासिक॰ षष्ठमासिक॰ ऊन
षाण्मासिक॰ सप्तममासिक॰ अष्टममासिक॰ नवममासिक॰ दशममासिक॰ ए
कादशमासिक॰ द्वादशमासिक॰ नित्कंदनगोत्ररामप्रेत ऊनाद्विकश्राद्धे चटे इदमा
सनमुपतिष्ठतु ॥ नित्कंदनगोत्ररामप्रेत क्षणपाद्य अर्घ्य गंध तुळसी भृंगीराज
आछादन फल अलंकारार्थे सर्वोपचारार्थे तिलानुपतिष्ठंतु ॥ चटाग्रे अन्नं आ
मं द्रव्यं वा निधाय प्रोक्ष्य परिषिच्य पृथिवी ते॰ चटस्यामुखे जुहोमि प्राणापाने॰
मासिमामक्षेष्ठामत्रामुष्मिं लोके इदं विष्णु॰ इदं आमं यथा सोपस्कारं नित्कंदनगो
त्राय रामप्रेताय अमृतरूपेणोपतिष्ठतु ॥ ब्रह्मार्पणं॰ प्रसीदतु ॥ एको विष्णुर्म॰
व्ययः ॥ अनेन आमसमर्पणेन भगवान् प्रेतस्य तुष्टिदाता महाविष्णुः प्रीयतां ॥

हो॰वि॰
३८

दक्षिणातांबूलमुपतिष्ठतु ॥ तूष्णीं भूमावुद्धिरव्य अवोक्ष्य ॥ पंचदशदर्भमयं ब
र्हिरास्तीर्य तस्योपरि तिलोदकमुपतिष्ठतु ॥ ऊनमासिकश्राद्धे अयं चरु पिंड उप
तिष्ठतु तस्योपरि तिलोदकमुपतिष्ठतु ॥ एवं तत्तन्मासिकश्राद्धोद्देशेन पिंडान्द
त्वा ॥ तिलोदक वासोदक अंजनाभ्यंजन गंधतुलसीपत्र भृंगराजनैवेद्यतां
बूल दक्षिणादि पिंडविसर्जनांतं सर्वं पूर्ववत् कृत्वा विसर्जयेत् ॥ इति मासिका
पकर्षप्रयोगः ॥ ॥ अथ सपिंडीकरणप्रयोगः ॥ पूर्वेद्युः षट् त्रीन्वा ब्रा
ह्मणानामंत्र्य ॥ ततः मध्यान्हे निमंत्रितान् विप्रानाहूय स्नाता दर्भासने प्रा
ङ्मुखउपविश्य आचम्य उत्तरीयवस्त्रं धृत्वा ॥ पवित्रेवंतः॰ घोरभं ॥ पवित्रं
धृत्वा ॥ ऊर्ध्वकेशीविं॰ पराजितेति दर्भेणशिखांबध्वा ॥ अपक्रामंतुभूतानि॰ ३८

श्राद्धकर्मसमारभेत् इति कल्पोः ॥ प्राणानायम्य ॥ निहन्मिसर्वंयद॰ धानाश्च
सर्वे ॥ पूर्वे कुशयवान् क्षिपेत् ॥ अपसव्यं तिलारक्षंतसु॰ रक्षकः दक्षिणे कु तिला
न्क्षिपेत् ॥ सव्यं ॥ अपवित्रः पवित्रो॰ भ्यंतरः शुचिः ॥ सर्वंशुचिः ॥ अपसव्यं ॥ श्रा
द्धभूमौ गयां॰ प्रवर्तते ॥ प्रवर्तय ॥ उदीरतामव॰ हवेषु ॥ आगच्छंतु श्राद्धका
ले प्रेतपितामहप्रपितामहवृध्दप्रपितामहाः सव्येन विश्वेदेवैः सह विष्णुर्वि
ष्णुश्रीमद्गतौ॰ श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं कामकालसंज्ञकानां वि
श्वेषां देवानां ॥ प्राचीनावीति ॥ नित्यंदनगोत्रस्य रामप्रेतस्य प्रेतत्वनिवृत्य
र्थं पितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थं नित्यंदनगोत्रां बद्धाळ गणेशरामश
णां
र्मणां वसुरुद्रादित्यस्वरूपाणां मृत पितामहा द्वादशे हनि सपिंडीकरणश्रा
णां एतेषां श्रेयोर्थं मोक्षार्थं तृप्त्यर्थं

णांपितामहप्रपितामहवृध्दप्रपितामहानां

स्थं सदैवं सपिंडं साग्नौकरणंपार्वणैकोद्दिष्टेन विधिना अन्नेन हविषा सद्यः करिष्ये
तदंगं गृहभांड भाजन शुध्यर्थं यवोदक तिलोदक क्षणपाद्यासनं च करिष्ये ॥ इमंमेगं
गे॰ गोमया॥ गंधद्वारां दु॰ येश्रियं॥ शरासः कु॰ न्यलिप्सत ॥ यवोसिधा॰ भिस्मृतं ॥ ति
लोसि सोम॰ स्वधानमः॥ याः फलिनी॰ चंस्वं हसः॥ अग्नेरेतः॰ तरेयं॥ एवं तिलोदकं कृ
त्वा॥ प्रेततिलोदकं च भिन्नं कृत्वा॥ यवोदक तिलोदक देवताभ्यः इदं गंध तुलसीपत्रं भृं
गिराजपत्रं सर्वे उपचाराः यवतिलैः सफलैः सहिरण्यैः संपूर्णाः संतु॥ यवोदक ति
लोदकान्वारब्धः सन् कुशांडे जुहुया॰ नुपहासाय॥ शुचीवोहव्या॰ स्पर्शयः॥
अपवित्रः॰ भ्यंतरः शुचिः॥ सर्वाणि स्थलानि शुचीनि भवंतु॥ पाकप्रोक्षणं॥
यद्देवादेव॰ दिम॥ गायत्र्यादि श्राधपाकादिनां पवित्रता सु सर्वे पाकाः शुचयो ३५

भवंतु॥ भवंतु शुचयः॥ ब्रह्मदंडार्थं सकुशहिरण्यं गृहित्वा॥ प्रदक्षिणा॥ स
मस्तसंपत्सम॰ पंकजं॥ यावतीर्वै देवता॰ प्रीणाति॥ आपसव्य॥ अक्रोधनै॰
कारिणः॥ अद्य तिथौ प्रेतस्य सपिंडीकरण श्राधं कर्तुं ममाधिकार संपदस्त्विति भ
वंतोब्रुवंतु॥ अस्तु श्राधाधिकार संपत्॥ कालस्य मुख्य कालोस्त्विति भवंतो ब्रुवंतु
काल कस्य मुख्य कालोस्तु॥ नमो देवेभ्यः॥ स्वधा प्रेतपितृभ्यः॥ सव्यं॥ कामकालसंव अपसव्यं
ज्ञकानां विश्वेषां देवानां॰ देवानां देवस्थाने क्षण दत्वा भवद्भिः प्रसादः कर्तव्यः॥ सुकृ
तव्यः॥ अपसव्यं॥ निल्फदन गोत्र राम प्रेतस्थाने क्षणमुपतिष्ठतु॥ पितामह प्रपि
तामह वृद्धप्रपितामहस्थाने क्षण दत्वा॰ कर्तव्यः॥ सुकर्तव्यः॥ सव्यं॥ सर्वेषां स्वागतं॥
सुस्वागतं॥ कामकालसंज्ञकाः विश्वेदेवाः ब्रह्मणे इदं वः पाद्यं॥ कृपार्घ्यं॥ अपसव्यं॥

श्रौ॰ वि॰

३६

निस्कंदनगोत्र रामप्रेत पाद्यमुपतिष्ठतु ॥ पीतामहप्रपितामहवृद्धप्रपितामहाः ब्रह्मावळगणेशरामशर्मणः निस्कंदनगोत्राः वसुरुद्रादित्यस्वरूपाः ब्रह्मणे इदं वः पाद्यं ॥ सुपाद्यं ॥ सव्यं ॥ देवाः समाध्वं ॥ सुसमास्महे ॥ अपसव्यं ॥ प्रेतः समध्वं ॥ पितामहं प्रपितामहवृद्धप्रपितामहाः समाध्वं ॥ सुसमास्महे ॥ सव्यं ॥ उपक्रांतं सपिंडीकरण श्राद्धाख्यं कर्मकरिष्ये ॥ अपसव्यं ॥ श्राद्धस्य कर्मणः सिद्धिरस्त्विति भवन्तो ब्रुवन्तु ॥ अस्तु श्राद्ध॰ सिद्धिः ॥ सव्यं ॥ विश्वेषां देवानां श्राद्ध॰ श्रुवंतु ॥ अस्तु॰ सिद्धिः ॥ आगच्छंतु महाभागा विश्वे॰ भवामा ॥ अपसव्य ॥ श्राद्धभूमौ गया॰ प्रवर्तते ॥ प्रवर्तया ॥ सव्यं ॥ कामकालसंचक्षकानां विश्वेषां देवानां विश्वे॰ नां ब्रह्मणे इदमासनं ॥ सुआसनं ॥ आस्यतां धर्मोसि आपः ॥ सापिंडिकरण श्राद्धे देवे

३६

क्षणः क्रियतां ॥ ओ तथा॰ प्राप्नुवानि ॥ अर्घ्यसाधनादि देवपूजां समाप्य ॥ शुश्रुतु तस्याप्रेत पितामहाद्यर्चनं करिष्ये ॥ अपसव्यं ॥ निस्कंदनगोत्रस्य रामप्रेतस्य ब्रह्मणे आसनमुपतिष्ठतु ॥ पितामहप्रपितामहवृद्धप्रपितामहानां ब्रह्मावळगणेशरामशर्मणां निस्कंदनगोत्राणां वसुरु॰ पाणां ब्रह्मणे इदमासनं ॥ सुआसनं आस्यतां धर्मोसि आपः ॥ सपिंडीकरण श्राद्धे प्रेते क्षणमुपतिष्ठतु ॥ पितामहप्रपितामहवृद्धप्रपितामहार्थे क्षणः क्रीयतां ॥ ओ तथा प्राप्नोतु भवान् प्राप्नुवानि ॥ प्रेत अर्घ्यपात्रं पितामहाद्यर्घ्यपात्राणि आसाद्य ॥ ततः प्रेताग्रे भूमिं प्रोक्ष्य पात्रमेकं निधाय पुनः प्रोक्ष्य चत्वारि दर्भशकलानि धायैं तिलान् विकीर्य तिलान् वामहस्ते गृहीत्वा प्रेतमावाहयिष्ये ॥ नरसविलुर्व॰ दद्यात् ॥ निस्कंदनगोत्र राम प्रेतमावा

ण्या

२ उदकमापूर्य

ह्यामि ॥ ततः पितामहादग्रे भूमिं प्रोक्ष्य पात्राणि निधाय ॥ उत्तानानि कृत्वा पुनः प्रो
क्ष्य त्रीन्त्रीन् दर्भशकलानि निधाय उदकमापूर्य तिलान् विकीर्य तिलान् वाम
हस्ते गृहीत्वा ॥ पितामहप्रपितामह वृद्धप्रपितामहान् आवाहयिष्ये ॥ आवाह
य ॥ उशंतस्त्वा हवा॰ अग्नये ॥ पितामह प्र॰ वृ॰ प्र॰ महान् आवाहयामि ॥ आयं
तु नः पि॰ तस्मान् ॥ प्रेत वो ऽत्र दृष्टमुपतिष्ठतु ॥ पिताम॰ वो ऽत्र दृष्टं गृह्णामि ॥ प्र॰ वो॰
वृ॰ प्र॰ वो॰ मि ॥ प्रेतार्घ्यपात्रे पितामहाद्यर्घ्यपात्रेषु इदं गं धतुलसीपत्रं भृंगिराजपत्रं
सर्वे उपचाराः तिलैः संपूर्णाः संतु ॥ प्रेतार्घ्यपात्रस्थ एकं दर्भं प्रेत ब्राह्मण हस्ते दत्वा ॥
नित्यंदनगोत्र राम प्रेत मर्घ्यमुपतिष्ठतु ॥ इति चतुर्थांशमुदकं दत्वा ॥ तत्र संयो
जनसंकल्पः ॥ अद्य पू॰ स्यर्थं नित्यंदनगोत्र राम प्रेत पितामहप्रपितामह वृद्ध

प्रपितामहैः बद्दुआंक गणेश राम शर्मभिः नित्यंदन गोत्रैः वसुरुद्रादित्यस्वरूपैः
सह अर्घ्योदकद्वारा संयोजयिष्ये ॥ संयोजय ॥ मधुवातेति मधु ॥ दधिक्राव्णो
ति दधि ॥ शुक्रमसीति घृतं ॥ शृंगवेर पयः पात्रेषु निधाय ॥ प्रेतार्घ्यपात्रं हस्ते गृ
हीत्वा ॥ अभिमंत्र्य ॥ संगच्छध्वं संवदध्वं संवो मनांसि जानतां ॥ देवा भागं यथा पूर्वे
संजानाना उपासत ॥ समानो मंत्रः समितिः समानी समानं मनः सह चित्तमेषां ॥
समानं केतो अभिसंरभध्वं संज्ञानेन वो हविषा यजामः ॥ समानीव आकूतिः स
माना हृदयानि वः ॥ समानमस्तु वो मनो यथा वः सुसहासति ॥ इत्यभिमंत्र्य ॥
पितामहार्घ्यपात्रस्थमेकं दर्भं सत्का प्रेतपात्रस्थमेकं दर्भं पितामहपात्रे निधाय ॥ नि
त्यंदनगो राम प्रेत पितामहेन बद्दुआंक शर्मणा नित्यंदन गोत्रेण वसुरूपेण सहा

र्घ्योदकद्वारा सायुज्यं गच्छ ॥ प्रेतपात्रस्थमर्घ्योदकं तृतीयांशं पितामहपात्रे नि
क्षिपेत् ॥ ओं नमो भगवते वासुदेवाय । विष्णुना सह ऐक्यं भव ॥ ये समाना
ये सजाता इति द्वाभ्यां मंत्रेण संयुक्तोदकमभिमंत्र्य ॥ ये समानाः समनसः
पितरो यमराज्ये ॥ तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां ॥ ये सजाताः
समनसो जीवा जीवेषु मामकाः ॥ तेषां श्रीर्मयि कल्पतामस्मिन्लोके शतं॰ स
माः ॥ एवं पुनः संगच्छध्वेत्यादित्रिभिर्मंत्रैः प्रेतार्घ्यपात्रमभिमंत्र्य ॥ संगच्छध्वं
सं॰ उपासत ॥ समानो मंत्रः समि॰ यजामः ॥ समानी व आकूति॰ सहासति ॥ इत्यभिमं
त्र्य ॥ प्रपितामहार्घ्यपात्रस्थमेकं दर्भं त्यक्त्वा प्रेतपात्रस्थमेकं दर्भं प्रपितामहपात्रे
निधाय ॥ निस्कंदन गोत्र राम प्रेत प्रपितामहेन गणेशशर्मणा निस्कंदन गोत्रेण रुद्र

रूपेण सहार्घ्योदकद्वारा सायुज्यं गच्छ ॥ प्रेतपात्रस्थमर्घ्योदकं द्वितीयांशं प्रपितामह
पात्रे निक्षिपेत् ॥ ओं नमो भ॰ देवाय ॥ विष्णुना॰ ऐक्यं भव ॥ ये समाना ये सजाता इति
द्वाभ्यां मंत्रेण पुनः संयुक्तोदकमभिमंत्र्य ॥ ये समानाः स॰ यमराज्ये । तेषां॰ कल्पतां ॥ ये
सजाताः स॰ मकाः । तेषां श्रि॰ शतं॰ समाः ॥ पुनः संगच्छध्वेत्यादित्रिभिर्मंत्रैः प्रेतार्घ्यपा
त्रमभिमंत्र्य ॥ संगच्छध्वं स॰ यतां । देवाभा॰ सत ॥ समानो मंत्रः स॰ मेषां । समानं के॰ जा
मः ॥ समानी व आकूतिः स॰ नि वः । समानमस्तु वो॰ सति ॥ इत्यभिमंत्र्य ॥ वृद्धप्रपिता
महार्घ्यपात्रस्थमेकं दर्भं त्यक्त्वा प्रेतपात्रस्थमेकं दर्भं वृद्धप्रपितामहपात्रे निधाय ॥
निस्कंदन गोत्र राम प्रेत वृद्धप्रपितामहेन रामशर्मणा निस्कंदन गोत्रेण आदित्य
रूपेण सहार्घ्योदकद्वारा सायुज्यं गच्छ ॥ प्रेतपात्रस्थमर्घ्योदकं सर्वं वृद्धप्रपितामहपा

त्रे निक्षिपेत् ॥ ॐ नमो भगवते वासुदेवाय । विष्णुना सह ऐक्यं भव ॥ ये समाना ये सजा
ता इति द्वाभ्यां मंत्रेण संयुक्तोदकमभिमंत्र्य ॥ ये समानाः स॰ राज्ये । तेषां लो॰ कल्पतां ॥ ये स
जाताः सम॰ मका ॥ तेषां श्रीर्म॰ शतं समाः ॥ मंत्रः प्रेतार्घ्यपात्रं भिन्ना त्यजेत् ॥ प्रकृत
इर्घ्यं दत्वा ॥ अस्मत्पितामह इदं ते अर्घ्यं स्वधा ॥ अस्मत्प्रपितामह॰ अस्मद्वृद्धप्रपिताम॰
या दिव्या आ॰ वर्चसा ॥ अस्त्वर्घ्यं दत्तं न मम ॥ पितृभ्यः स्थानमसि । स्थानमसि प्र
च्छाद्य ॥ नित्स्कंदनगोत्र रामप्रेत गंधमुपतिष्ठतु ॥ पुष्प तुलसीदल पत्र भृंगिराज प
त्र धूपदीप आच्छादन पूगीफल पवित्र सर्वोपचारार्थे तिलाः उपतिष्ठंतु ॥ पि
तामह प्रपितामह वृद्धप्रपितामहाः बल्लाल गणेश राम शर्मणः वसुरुद्रादि
त्यस्वरूपाः यथाभागशः अमी ते गंधाः ॥ पुष्प तुलसीपत्र भृंगिराज

पत्र धूपदीप आच्छादन तांबूल पवित्र ॥ इदं पितृ॰ विष्णुनमः पितृभ्यः आसनादि॰ अक्षु
विधिवत् ॥ यस्य स्मृत्या॰ युष्मदनुज्ञया मंडलादि करिष्ये ॥ देवाग्रे चतुरस्रं ॥ प्रेताग्रे त्रि
कोणं ॥ पितामहाद्यग्रे वर्तुलं ॥ पात्राणि निधाय ॥ तूष्णीं प्रेतपात्रे अप दक्षिण रक्षांप

अपसव्यं

रिवेष्टयेत् ॥ पितामहादिपात्रे बृहत्साम॰ रेणरक्ष । सव्यं ॥ रक्षोह॰ पंक्तिदोषोनविघ
ने ॥ अपसव्यं ॥ प्रेत पितामहादीनां करशुद्धिः ॥ सव्यं ॥ देवानां करशुद्धिः ॥ उद्धरिष्या॰
कीयतां ॥ ~~मूर्धानं देवा~~ । एवं पात्रद्वये आज्यमभिघार्य उद्धृत्य ॥ मूर्धानं॰ देवाः ॥ अद्य
पूर्वो॰ श्राद्धार्थं प्रेताग्नौकरणं करिष्ये ॥ अग्निं प्रतिष्ठाप्य ॥ तूष्णीं परिसमूहनादि कृत्वा ॥ नि
त्स्कंदनगोत्राय रामप्रेताय स्वाहा ॥ पितामहाद्यग्नौकरणं करिष्ये ॥ क॰ पवाहननामान
मग्निं प्रतिष्ठापयामीत्यादि प्रकृतिवत् समाप्य ॥ शेषं पितामहादिपात्रे निधाय आमान्तु॰

गिरः॥ सोमो धे॰ नस्मै॥ उपह्वयेसुदुघांइत्यादिसूक्तानि पठित्वा॥ तत्सवितुर्व॰ प्रचोद
यात् इति पात्राणि प्रोक्ष्य॥ ससंतर्जेन परिषिंचाम्नि पृथिवितेपात्रं इत्यादि देशान्ननिवेद
नं कृत्वा॥ देशानुज्ञया प्रेतपितामहार्थंन निवेदनं करिष्ये॥ अपसव्यं॥ प्रेतपात्रे तूष्णीं
परिषिच्य पृथिवीतेपात्रं द्यौ॰ न्पाशितमसिमामेक्षेष्ठामुत्रामुष्मिन् लोके इदं विष्णु॰
पांसुरे निस्कंदन गोत्राय रामप्रेताय इदमिदं॰ अमृतरूपेणोपतिष्ठतु॥ ससंतर्जे
न॰ पृथिवीते॰ इत्यादि पितामहादिभ्यः अन्ननिवेदनं प्रकृतिवत्॥ येचेह॰ स्वधानमः॥
मधुमतीश्च॰ मधुवाता॰॥ ब्रह्मार्पणं॰ प्रसीदतु॥ अपसव्यं॥ एको विष्णु॰ व्यपः॥
अनेन सपिंडीकरण आधीय ब्राह्मणभोजनेन प्रेतपितामहप्रपितामह वृद्धप्रपि
तामहस्वरूपी जनार्दनवासुदेवः प्रीयतांनमम॥ ब्राह्मणेभ्यः आपोशानं दत्वा गाय

२ प्रेतपिंडार्थं दक्षिणतः वेद्युपरि
त्रीं जप्त्वा॥ अपेक्षितं॰ भोक्तव्यं॥ जुषामहे॥ अन्नेषु स्थित्यस्यहविषो॰ विकीरं दद्यात्॥
उत्तरापोशनं च दत्वा॥ ~~अद्यांशेषु~~ सपिंडीकरणश्राद्धे पिंडप्रदानं करिष्ये॥ पिंडस्था धः दर्भा
स्तनमुपतिष्ठतु तिलोदं॰ निस्कंदन गोत्र राम प्रेत अयं ते चरु पिंडस्तवोपतिष्ठतु॥ तिलोद
क मु॰ गंध तुलसीपत्र भृंगिराज पत्र धूप दीप नैवेद्य तांबूल दक्षिणामुपति॰ सर्वो
पचारार्थे तिलाः उप॰॥ तदुत्तरे पितामहादिभ्यः प्रकृतिवत् पिंडदानं कुर्यात्॥
तद्यथा॥ अपहता असुरा रक्षांसि॰ इत्यादि पिंडदानं॥ अत्र पितरो मादयध्वं॥ दक्षिणां
तोपचारैः संपूज्य॥ ततः प्रेतब्राह्मणहस्ते तूष्णीं जलं दत्वा॥ निस्कंदन गोत्रस्य
राम प्रेतस्य सपिंडीकरण श्राद्धीयमन्नमुदकमुपतिष्ठतु॥ विप्रोपद दक्षिणां
दत्वा॥ प्रेतब्राह्मणं विसर्जयेत्॥ अद्य पूर्वो॰ फलप्राप्त्यर्थं निस्कंदन गोत्रस्य राम प्रे

तस्य प्रेतत्वनिवृत्यर्थं पितृत्वप्राप्त्योत्तमलोकप्राप्त्यर्थं मोक्षधेनुदानं करिष्ये ॥ प्रत्यक्षं
चेत् गोदानप्रयोगवत् कुर्यात् ॥ निष्क्रयेतु ॥ द्रव्यरूपीगोपूजनं ब्राह्मणपूजनं च करि
ष्ये ॥ दानमंत्रः ॥ मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन ॥ मोक्षधेनुप्रदानेन मुकुंद प्रीय
तां मम ॥ अथ पिंडसंयोजनं ॥ देशकालौ संकीर्त्य॰ फलप्राप्त्यर्थं निस्कंदनगोत्र रामप्रे
त पितामह प्रपितामह वृद्धप्रपितामहैः बह्वाळ गणेश रामशर्मभिः निस्कंद
नगोत्रैः वसुरुद्रादित्यस्वरूपैः सह पिंडद्वारा संयोजयिष्ये ॥ एकस्मिन्पा
त्रे दधि मधु घृत मेकीकृत्य तेन प्रेतपिंडं लेपयेत् ॥ मंत्रैः ॥ मधुवाता ऋता॰
दधिक्राव्णो॰ घृतं मिमिक्षिरे॰ हव्यं ॥ दर्भमयरज्जुं हिरण्यं गृहीत्वा ॥
ओं नमो भगवते वासुदेवाय इति मंत्रेण प्रेतपिंडं त्रिधा विभज्य ॥ प्रथमप्रे

तपिंडशकलं हस्ते गृहीत्वा ॥ मध्वादिना लेप्य ॥ संगच्छध्वेति मंत्रैः अभिमंत्र्य
निस्कंदनगोत्र रामप्रेत पितामहेन बह्वाळ शर्मणा निस्कंदनगोत्रेण वसुस्व
रूपेण सह पिंडद्वारा सायुज्यं गच्छ ओं नमो भगवते वासुदेवाय विष्णुना सह
एकत्वं भव ॥ इति पितामहपिंडे एकीकृत्य ॥ अभिमंत्र्य ॥ ये समानाः
सम॰ ये सजाताः स॰ समाः ॥ स्थाने निदधाति ॥ द्वितीयं प्रेतपिंडशकलं हस्ते
गृहीत्वा ॥ मध्वादिना लेप्य ॥ संगच्छध्वेति मंत्रैः अभिमंत्र्य ॥ निस्कंदनगोत्र रामप्रे
त प्रपितामहेन गणेशशर्मणा निस्कंदनगोत्रेण रुद्ररूपेण सह पिंडद्वारा सायु
ज्यं गच्छ ओं नमो भगवते वा॰ भव ॥ इति प्रपितामहपिंडे एकीकृत्य ॥ अभिमंत्र्य ॥ ये स
मानाः स॰ ये सजाताः स॰ समाः ॥ स्थाने निधाय ॥ तृतीयं प्रेतपिंडशकलं हस्ते गृही

त्वा ॥ मध्वादिना लेप्य ॥ संगच्छध्वेति मंत्रैः अभिमंत्र्य ॥ नित्यकंदनगोत्र रामशर्मन् वृद्ध
प्रपितामहेन नित्यकंदनगोत्रेण रामशर्मणा आदित्यरूपेण सह पिंडद्वारा सायुज्यं
गच्छ ओं नमो भगवते वासुदेवाय विष्णुना सह ऐक्यं भव ॥ इति वृद्धप्रपितामहपिं
डे एकीकृत्य ~~[illegible]~~ अभिमंत्र्य ॥ ये समानाः स॰ ये सजाताः स॰ समाः ॥ निधाय ॥
प्रेतपिंडाधस्थ कुशान् पितामहाद्यधस्थकुशेषु योजयेत् ॥ युक्तकुशेषु संयुक्तपिं
डान् पितृपितामहप्रपितामहेभ्यः दत्तो नरं वृद्धप्रपितामहो निवर्तते ॥ प्रकृतिवत् पिं
उदानं ॥ स्वधा ॥ मार्जयंतां पितरः सोम्या॰ प्यासः एतत्ते अस्मत्पितः रामशर्मन् नि
त्यकंदनगोत्र वसुरूपये च त्वामत्रानु अस्मत्पित्रे रामशर्मणे नित्यकंदनगोत्राय वसुरूपाय
अयं पिंडः स्वधा नमः ॥ गयायां धौरते नोन मम ॥ ॥ भ्यश्च गयायां॰ एवं पितामह प्रपिता

पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य

महयोः ॥ उत्तरीय वस्त्रं स्थालीं च विसृज्य ॥ अत्र पितरो मादयध्वं । अमीमदंत॰ इत्यादि
शेषं प्रकृतिवत् समाप्य ॥ अनेन सपिंडीकरणश्राद्धाख्येन कर्मणा पितरः स्वरूपी जना
र्दनवासुदेवः प्रीयतां ॥ इति सपिंडीकरणं ॥ ॥ अथ पंथाश्राद्धं ॥ द्वादशे त्रयोदशेन्हि
वा कार्यं ॥ आचम्य फलप्रास्यर्थं पुरूरवाद्रव॰ देवानां ॥ प्राचीनावीति ॥ पितृपितामहप्र
पितामहानां नित्यकंदनगोत्राणां वसुरुद्रादित्यस्वरूपाणां वृद्धप्रपितामहस्य नांदी
मुख्यलोक गमनार्थं सुखेन पंथापरिव्ययार्थं पाथेयश्राद्धं करिष्ये ॥ नित्यश्रा
द्धवत् कृत्वा ॥ आसन उपानहौ वस्त्र छत्र यष्टि उदकुंभ दीप यथाशक्ति दद्यात् ॥ आम
पक्षे तु ॥ आमेन विधिना पाथेयश्राद्धं करिष्ये ॥ यवोदक तिलोदकं कृत्वा ॥ चरान् स्थाप्य ॥
पुरूरवाद्रव॰ देवानां च ठेइदमासनं ॥ गंधादि संपूज्य ॥ अप॰ पितृपितामह प्रपितामह

हो॰ वि॰
४३

सव्यं

हानां चटेइदमासनं ॥ गंधादिसं पूज्य ॥ (सव्यं) चटाग्रे आमं निष्क्रयद्रव्यं वा संस्थाप्य ॥ पृथि
वीतेपात्रं द्यौ॰ चरस्य मुखे जुहोमि प्राणा॰ देवेभ्यः इदं आमं सोपस्करं ॰ अन्नरूपेण
स्वाहा हव्यं न मम ॥ ये देवा॰ प्रीयंतां देवानु॰ पित्रादि आमनिवेदनं करिष्ये ॥ अपसव्यं ॥
पृथिवीते॰ गोत्र पितृपितामहप्रपितामहेभ्यः इदं आमं सोपस्करं अन्नरूपेण स्वधा
कव्यं न मम ॥ ब्रह्मार्पणं ब्र॰ दत्तु ॥ अपसव्यं ॥ एकोविष्णु॰ व्यय ॥ अनेन आमान्न
द्वारा चटभोजनेन पितृपिता॰ प्रीयतां न मम ॥ पाथेयश्राद्धे सक्तुपिंडप्रदानं क
रिष्ये ॥ पिंडदानं कृत्वा ॥ चटेभ्यः तांबूलं दक्षिणां च दत्वा विसृज्य ॥ अनेन पाथे
यश्राद्धाख्येन कर्मणा पितरः प्रीयंतां ॥ ॥ अथोदकुंभश्राद्धं ॥ आचम्य पवि
त्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य फलप्राप्त्यर्थं ॥ प्राचीनावीति पित्राद्युच्चार्य ब्र

पाथेयश्राद्धीय

४३

ह्मार्पणेन विधिना उदकुंभश्राद्धं करिष्ये ॥ ब्राह्मणपूजनं विधाय ॥ उदकुंभपूजनं
च कृत्वा ॥ इदमन्नं सोदकुंभं ब्राह्मणाय निवेदनं कृत्वा ॥ ब्रह्मार्पणं ॥ एष धर्मघटोद॰
अक्षय्यमुप॰ इति उदकुंभजलं ब्राह्मणहे दद्यात् दक्षिणां दत्वा ॥ इत्युदकुंभश्राद्धं ॥
अथ शांत्योदकं ॥ कर्ता स्वहस्तेन तैलाभ्यंगं कृत्वा स्नात्वा शुक्लवासः परिधाय ॥ आच
म्य फलप्राप्त्यर्थं मम पितुः निधनसूचितसकलारिष्टनिरसनद्वारा तथा अवशिष्ट
प्राणिनां क्षेमायुःसुखप्राप्तये च श्रीपरमेश्वरप्रीत्यर्थं निधनशांतिं करिष्ये ॥ त
त्रादौ गणपतिपूजनं स्वस्तिपुण्याहवाचनं शांतिकलशस्थापनं च करिष्ये ॥ यथाशक्त
त्यं स्वस्त्ययनं वाचयित्वा ॥ ब्राह्मणैः शांतिसूक्तानि पठित्वा ॥ आचार्यादीन् सं
पूज्य आशिषो गृहीत्वा दक्षिणां दत्वा यथासंभवं ब्राह्मणभोजनं संकल्प्य ॥ शांति

फलशांपिविसृज्य ॥ ततऊर्ध्वं चंदनधारणं तांबूलभक्षणं चकुर्यात् ॥ आचारात् कुर्युः स्वबांधवादिभिः उष्णीषादि दद्यात् ॥ तदनंतरं देवदर्शनं कार्यं ॥ इति भूमितोदकं ॥

अथ मासिकानि ॥ आचम्य फलमाश्यर्थं पुरूरवो॰ देवानां ॥ अपसव्यं ॥ अस्मत्पितृपि॰ नां उन्मासिक द्वितीय॰ त्रैपक्षिक॰ तृतीय॰ चतुर्थ॰ पंचम॰ षष्ठ॰ ऊनषष्ठ॰ सप्तम॰ अष्टम॰ नवम॰ दशम॰ एकादश॰ द्वादश॰ ऊनाब्दिक मासिक एतानि पंचदशमासिकश्राद्धानि स्वेस्वे कालेकर्तव्यानि मम कुले वृद्धिश्राद्धाधिकारसिध्यर्थं अपकृष्य त्रयोदशाहे पंचदशमासिकात्मकं श्राद्धं सदैवं साग्नौ करणं सपिंडं पार्वणेन विधिना अन्नेन हविषा सद्यः करिष्ये ॥ श्राद्धवत् समाप्य ॥ ॥ इति मासिकानि ॥

॥ इति होत्रविधानप्रयोगः समाप्तः ॥ [illegible]